मन्त्रात्मक सप्तशती

प्रकाशक
कल्याण मन्दिर प्रकाशन
श्रीचण्डी-धाम, प्रयाग-राज-२११००६

मन्त्रात्मक सप्तशती

उपहार-दाता

गुप्तावतार 'बाबाश्री'

प्रकाशक

कल्याण मन्दिर प्रकाशन

श्रीचण्डी-धाम, प्रयाग-राज-२११००६

'कौल-कल्पतरु'
चण्डी

मन्त्रात्मक सप्तशती

प्रथम भाग

मधु-कैटभ-वधः

***

उपहार-दाता

'गुप्तावतार'

पूज्य बाबाश्री मोतीलाल जी

***

सम्पादक

प्रातः-स्मरणीय

'कुल-भूषण' पं० रमादत्त शुक्ल

***

प्रकाशक

पण्डित देवीदत्त शुक्ल स्मारक

परा-वाणी आध्यात्मिक शोध-संस्थान

कल्याण मन्दिर प्रकाशन

श्रीचण्डी-धाम, प्रयाग-राज-२११००६

फोन : ०५३२-२५०२७८३ मो०: ९४५०२२२७६७

प्रकाशक
पण्डित देवीदत्त शुक्ल स्मारक
परा-वाणी आध्यात्मिक शोध-संस्थान
कल्याण मन्दिर प्रकाशन
श्रीचण्डी-धाम, प्रयाग-राज-२११००६ ☎ ९४५०२२२७६७

अनुक्रम

अनुदान
छः सौ पचास रु० (६५०/-)

पञ्चम संस्करण
शाकम्भरी जयन्ती
'पराभव' सं० २०७० वि०-१६ जनवरी, २०१४

मुद्रक
परा-वाणी प्रेस
अलोपी-देवी मार्ग, प्रयाग-राज (उ०प्र०)

दो शब्द

'श्रीदुर्गा-सप्तशती' का प्रस्तुत संस्करण **गुप्तावतार पूज्य बाबा-श्री** द्वारा अपने प्रिय स्वदेश भारतवर्ष के प्रति दिया गया एक **अनूठा** और **अद्वितीय उपहार** है। इसकी पाण्डु-लिपि आपने अपने कर-कमलों से उस विलक्षण अनुष्ठान के लिए तैयार की थी, जिसके सम्पन्न होने के फल-स्वरूप ही संवत् १९९९ वि० - सन् १९४२ ई० में **'भारत छोड़ो'-आन्दोलन** हुआ और **भारत स्वतन्त्र** हुआ।

पूज्य-चरण बाबा मोतीलाल जी महाराज ने **'श्रीदुर्गा-सप्तशती'** के इस संस्करण के सम्बन्ध में अपने कर-कमलों से लिखित रजिस्टर के प्रारम्भ में लिखा है कि—

''....हिमालय के प्रवास में नेपाल की तिब्बती सीमा पर एक ब्राह्मण नेवार शिष्य-साधक ने **'मन्त्रात्मक सप्तशती'** की यह प्रति मुझे दी, जो अपने ढङ्ग की अनूठी है। यह **पाण्डु-लिपि—संवत् ११२१ वि०** (सन् १०६४ ई०) की थी।...''

'मन्त्रात्मक सप्तशती' के प्रस्तुत संस्करण को **बाबा-श्री** ने संवत् १९८१ वि- सन् १९२४ ई० में काशी में पुनः लिपि-बद्ध किया था। इसमें उन्होंने विस्तार-पूर्वक **श्रीदुर्गा-सप्तशती के ७०० मन्त्रों का सम्पूर्ण पूजा-विधान** व **आहुति-प्रकार** लिखा। दैव-योग से **बाबा-श्री** द्वारा लिखित रजिस्टर **'श्रीचण्डी-धाम'** में आज भी सुरक्षित हैं।

यहाँ यह उल्लेखनीय है कि प्रस्तुत **'मन्त्रात्मक सप्तशती'** में **प्रत्येक मन्त्र के अनुष्ठान** की जो विधि दी गई है, वह देखने से ही बड़ी वैज्ञानिक प्रतीत होती है। साधकों की सुविधा के लिए प्रस्तुत **नवीन संस्करण** द्वारा **प्रत्येक मन्त्र का विधान** और अधिक स्पष्ट रूप में अलग-अलग प्रकाशित किया जा रहा है। इससे कोई भी श्रद्धालु व्यक्ति सहज ही अपने **अभीष्ट मन्त्र का अनुष्ठान** कर लाभ उठा सकता है।

अन्त में यह लिखना आवश्यक है कि लोगों को अपने **गुरु-देव की अनुमति** प्राप्त कर ही **'मन्त्रात्मक सप्तशती'** के अनुसार किसी अनुष्ठान में प्रवृत्त होना चाहिए।

प्रयाग-राज —**'कुल-भूषण'**

परिचय

हम सबको **'उपहार'**-स्वरूप **'मन्त्रात्मक सप्तशती'** देनेवाले **पूज्य बाबा-श्री** का जन्म सं० १६४१ वि० की **श्रावण कृष्णा त्रयोदशी** को हुआ था। सं० २०५८ वि० अर्थात् आपकी **११७वीं जयन्ती** के पावन अवसर पर **'मन्त्रात्मक सप्तशती'** के **तृतीय नए संस्करण** को प्रकाशित करते हुए हमें बहुत प्रसन्नता हो रही है। इस **तृतीय नए संस्करण** के प्रकाशन के सन्दर्भ में हमें **'चण्डी'**-पत्रिका के अनन्य सहयोगी एवं **कौलाचार्य पण्डित नथमल दाधीच** के सु-योग्य शिष्य वयो-वृद्ध **श्री निश्चलानन्दनाथजी** द्वारा विशेष सहयोग-प्रेरणा प्राप्त हुई है। अतः हम उनके प्रति हृदय से आभारी हैं।

परम पूज्य बाबा-श्री मन्त्र-शास्त्र के गहन ज्ञाता होने के साथ ही **परम देश-भक्त** थे। **'बाबा-श्री चरितामृत'**-नामक आपके परिचय-ग्रन्थ में आपके सम्बन्ध में सन् १६२७ से सम्पर्क में रहनेवाले **श्री यशवन्त केशव प्रधान जी** लिखते हैं कि—

"....सन् १६३० में जिन दिनों सारे देश में महात्मा गान्धी का आन्दोलन प्रारम्भ होकर उच्च स्थिति को प्राप्त कर रहा था, उन दिनों श्री बाबा जी महाराज सदा चिन्ता-ग्रस्त मालूम होते थे। भारत-वर्ष की भावी स्थिति के सम्बन्ध में वे सदैव चिन्तित रहते थे। मेरे देखने में जो श्रेष्ठ उपासक पुरुष, साधु-सन्त इत्यादि अब तक आए हैं, उनमें से अधिकांश अपनी स्वयं की उन्नति किस प्रकार हो सकती है, इसी विचार में मग्न रहनेवाले रहे हैं। **'भारत का पुनरुत्थान कैसे होगा और कैसे किया जाए?'**—इस प्रकार का विचार करनेवाले केवल बाबाजी महाराज मिले। उनके जैसा अपने शिष्य की उन्नतावस्था के लिए सदा सूक्ष्म दृष्टि से विचार करनेवाला और साथ-ही-साथ अपने राष्ट्र के सम्बन्ध में विचार करनेवाला सन्त मेरे देखने में तथा अध्ययन करने में अन्य कोई नहीं हुआ।

पूज्य श्रीबाबा जी ने **भारत के उत्थान** के लिए **'शत-चण्डी यज्ञ'** भी किया था। इसके लिए उनके निर्देशानुसार निम्न **'सङ्कल्प'** के अनुसार चैत्र पूर्णिमा के दिन अनुष्ठान प्रारम्भ हुआ। यथा—

"मम देशस्य क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा- योग-माया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्-वीज-स्व-वीज-लोम-विलोम-पुटितोक्त शरणागत-सम्पुटित-श्रीसप्तशत्यन्तर्गत अमुक (श्लोक सं०) मन्त्र-जपे विनियोगः।"

पूज्य बाबा-श्री ने हमें उक्त **'सङ्कल्प'** के साथ ही **सप्तशती के श्लोक-पाठ** भी दिखलाए। श्लोकों का अर्थ बताने के साथ-साथ, किन-किन कार्यों में इन श्लोकों का **'अनुष्ठान'** किया जाता है व किसने-किसने ऐसे **'अनुष्ठान'** किए हैं, इस सबका उन्होंने वर्णन किया। प्रत्येक श्लोक का कौन **'ऋषि'** है?, कौन **'देवता'** है?, मन्त्र-**'शक्ति'** कौन है?, **'बीज'** क्या है?, **'विद्या'** कौन-सी है?, कौन-सा **'गुण'** है?, कौन-सी **'इन्द्रिय'** है?, कौन-सा **'रस'** है?, कौन-सी **'कर्मेन्द्रिय'** है?, कौन-सा **'स्वर'** है?, कौन से **'तत्त्व'** हैं?, कौन-सी **'कला'** है?, कौन-सी **'मुद्रा'** है? और क्या **'ध्यान'** है?—इत्यादि समस्त बातें जब बाबा-श्री ने हमें बता दीं, तब हम सब लोगों ने मन्त्र के द्वारा **'आहुति'** दी।

इस प्रकार दस आदमी—दस बार मन्त्र पढ़कर **'आहुति'** देते थे। नित्य दस श्लोक होते थे और अन्त में **'आरती'** आदि होने के पश्चात् **'प्रसाद'** बाँटा जाता था। फिर रात के एक बज़े के बाद सारा समूह बाबाजी के साथ सागर के किनारे **'श्मशान-भूमि'** के पास बैठता था और प्रायः प्रातः चार बजे हमें बाँदरा स्टेशन पर पहुँचा दिया जाता था।

उक्त **'अनुष्ठान'** के पूर्ण होने में लगभग तीन मास लग गए। **'अनुष्ठान'** के पूर्ण होने पर पूज्य बाबाजी के निर्देशों से ऐसा आभास हुआ कि इसी प्रकार के और भी महत्त्व के **'अनुष्ठानों'** का योग आएगा।

दूसरा **'अनुष्ठान'** श्रावण मास में आरम्भ हुआ था। इस बार किसी **'यन्त्र'** की प्रतिष्ठा नहीं की गई। **'चाँदी'** का एक विशाल **'कुम्भ'**, जो पहले के **'कुम्भ'** से अधिक बड़ा था, एक **'यन्त्र'** पर स्थापित किया गया था। इस दूसरे **'अनुष्ठान'** का **'सङ्कल्प'** तीव्र था। भगवती योग-माया दुर्गा देवी के प्रसाद से स्वदेश के शत्रुओं पर विजय प्राप्त कर देश की स्वतन्त्रता के लिए पूर्व-वत् बीज-सहित प्रत्येक श्लोक को —**'इत्थं यदा यदा बाधा, दानवोत्या भविष्यति। तदा तदावतीर्याऽहं, करिष्याम्यरि-संक्षयम्।'**—इस मन्त्र से सम्पुटित कर **'अनुष्ठान'** किया गया।

बाबाश्री ने **'सप्तशती'** के कुछ श्लोकों के लिए—

''कु - नीतिनः ब्रिटेनस्य, गृहीत्वा त्वमुपागता। लोकेषु विनाशाय ख्याता देवि! भविष्यसि।।''

उक्त **'पाठ'** लेकर **'हवन'** किया था। इसी प्रकार शेष श्लोकों के लिए—

''त्रैलोक्यमिन्द्रो लाभवान्, देवाः सन्तु हविर्भुजः। यूयं गच्छतु इंग्लैण्डं, यदि व्यापारमिच्छथ।।''

उक्त **'पाठ'** लेकर **'हवन'** किया था। कुछ समय के बाद मैंने महाराज-श्री से पूछा था कि—**''इस याग की फलद्रूपता कब होगी?''** उन्होंने बताया कि **''अभी और तम बाकी है। तीसरा 'अनुष्ठान' हो जाए, तो जल्दी ही सिद्धि प्राप्त होगी। नहीं तो तम निरसन होने में नौ या ग्यारह वर्ष लगेंगे।''** ऐसा ही हुआ। ग्यारह वर्षों के बाद ८ अगस्त, १९४२ को **'क्विट इण्डिया'** की घोषणा हुई और आगे के ९ वर्षों की अवधि के भीतर ही स्वराज मिल गया और **२६ जनवरी, १९५० को 'स्वतन्त्र भारत'** की घोषणा हो गई...''

स्पष्ट है कि **बाबा-श्री** द्वारा प्राप्त प्रस्तुत **'मन्त्रात्मक सप्तशती'**-नामक विधान अत्यन्त विलक्षण है। इसके द्वारा **पूज्य बाबा-श्री** ने भारत की स्वतन्त्रता हेतु **'अनुष्ठान'** कर हमें जो प्रेरणा दी है, वह अपने आप में अपूर्व एवं पूर्णतया फल-प्रद है। **'मन्त्रात्मक-सप्तशती'**-जैसे साङ्गोपाङ्ग **'अनुष्ठान'** के द्वारा हम अपना एवं अपने देश का अभीष्ट कल्याण करें, यही **बाबा-श्री** की इच्छा थी। हमें **बाबा-श्री** की इस इच्छा को सदैव ध्यान में रखना चाहिए।

प्रयाग-राज

—ऋतशील शर्मा

‘साधना’ की कुछ विशेष बातें

- ☐ **‘मन्त्रात्मक सप्तशती’** में **‘श्रीदुर्गा-सप्तशती’** के प्रत्येक मन्त्र का साङ्गोपाङ्ग विधान है। इसमें मन्त्र के १४ अङ्गों का वर्णन है। यथा— (१) **ऋषि,** (२) **देवता,** (३) **बीज,** (४) **शक्ति,** (५) **महा-विद्या,** (६) **गुण,** (७) **ज्ञानेन्द्रिय,** (८) **रस,** (९) **कर्मेन्द्रिय,** (१०) **स्वर,** (११) **तत्त्व,** (१२) **कला,** (१३) **उत्कीलन,** (१४) **मुद्रा।** मन्त्र के इन १४ अङ्गों से तादात्म्य स्थापित होने पर श्रीजगदम्बा-योगमाया-भगवती दुर्गा की कृपा प्राप्त होती है।

- ☐ मन्त्र का पहला अङ्ग **‘ऋषि’** होता है। **‘ऋषि’**-शब्द गत्यर्थक ‘ऋ’-धातु और ‘षिङ् प्रापणे’ प्रत्यय से बना है; जिससे उस परम साधक का बोध होता है, जो मन्त्र की वास्तविक गति से परमात्मा के स्वरूप को स्वयं प्राप्त करता है एवं कराता है। इस प्रकार किसी **‘मन्त्र’** को सिद्ध करने के लिए मन्त्र के **‘ऋषि’** से तादात्म्य स्थापित करना परम आवश्यक है।

- ☐ **‘देवता’**—मन्त्र का दूसरा अङ्ग है। इसके द्वारा साधक को **‘देव-भाव’** की प्राप्ति होती है।

- ☐ **‘बीज’**—मन्त्र के स्फुरण एवं विकास का केन्द्र है, इसकी अपने में स्थापना होने से ही अभीष्ट **‘फल की प्राप्ति’** होती है।

- ☐ **‘शक्ति’**—मन्त्र की **‘क्रिया-शक्ति’** का बोधक है। इससे तादात्म्य होने पर साधक की **‘क्रिया-शक्ति’** मन्त्र-मय हो जाती है।

- ☐ **‘महा-विद्या’**—मन्त्र की **‘मूल प्रकृति’** की सूचक है। इससे तादात्म्य होने पर साधक की **‘प्रकृति’** भी मन्त्र-मय हो जाती है।

- ☐ **‘गुण’**, **‘ज्ञानेन्द्रिय’**, **‘रस’**, **‘कर्मेन्द्रिय’**, **‘स्वर’**, **‘तत्त्व’**, **‘कला’**—मन्त्र के अन्य विशिष्ट अङ्ग हैं। इनसे तादात्म्य होने पर साधक का **‘मन्त्र से सीधा सम्बन्ध’** हो जाता है।

- ☐ मन्त्र का **‘ऊर्जा’**-स्वरूप **‘उत्कीलन’** द्वारा हस्तगत होता है। इससे तादात्म्य स्थापित होने पर मन्त्र की **‘ऊर्जा’** प्रवाहित होने लगती है।

- ☐ मन्त्र की **‘ऊर्जा’** सतत प्रवाहित होने के लिए मन्त्र की प्रसन्नता-कारक-शक्ति—**‘मुद्रा’** का ज्ञान होना आवश्यक है। अतः सम्पूर्ण शरीर में इसकी प्रतिष्ठा की जाती है।

- ☐ अभीष्ट फल की प्राप्ति साधक के प्रार्थना-भाव की गहराई पर निर्भर होती है। अतः ‘अञ्जलि’ —**‘प्रार्थना-मुद्रा’** में जुड़े दोनों हाथों में इसका **‘न्यास’** किया जाता है।

- ☐ मन्त्र के अक्षरों को छः भागों में विभाजित करके छः कर-अङ्गों—**१ अँगूठों, २ तर्जनियों, ३ मध्यमाओं, ४ अनामिकाओं, ५ कनिष्ठिकाओं** और **६ करतल-करपृष्ठ** में तथा छः प्रधान

अङ्गों—१ **हृदय**, २ **शिर**, ३ **शिखा**, ४ **कवच**, ५ **नेत्र** और ६ **अस्त्र** में प्रतिष्ठित किया जाता है।

☐ **'अंगुष्ठाभ्यां नमः'**, **'हृदयाय नमः'** का तात्पर्य यह है कि भावना-मय देवता के समक्ष साधक सब प्रकार से अपनी विनम्रता प्रकट करता है।

☐ **'तर्जनीभ्यां स्वाहा'**, **'शिरसे स्वाहा'** का तात्पर्य यह है कि साधक क्षुद्र **'अहन्ता'** के स्थान पर दिव्य **'अहन्ता'** का अनुभव करता है।

☐ **'मध्यमाभ्यां वषट्'**, **'शिखायै वषट्'** के द्वारा साधक **'आत्मा'** के दिव्य तेजो-मय स्वरूप का अनुभव करता है। **'वषट्'** का अर्थ समर्पण है।

☐ **'अनामिकाभ्यां हुम्'**, **'कवचाय हुम्'** के द्वारा साधक अपने तेजो-मय स्वरूप के सुरक्षित होने की भावना करता है। इससे साधक में दूसरों के लिए भय-प्रद और अपने लिए रक्षा-कारक तेज का प्रादुर्भाव होता है।

☐ **'कनिष्ठिकाभ्यां वौषट्'**, **'नेत्र-त्रयाय वौषट्'** के द्वारा साधक **'मन्त्र-रूपी आत्म-शक्ति'** का साक्षात्कार करता है।

☐ **'करतल-करपृष्ठाभ्यां फट्'**, **'अस्त्राय फट्'** के द्वारा साधक अपने तीनों प्रकार के तापों को दूर फेंककर मन्त्र-शक्ति की ज्ञानाग्नि में जलाकर भस्म करने की भावना करता है।

इस प्रकार साधना करने से **अभीष्ट फल** की प्राप्ति निश्चित होती है। **पूज्य बाबा-श्री** ने **श्रीदुर्गा-सप्तशती** के प्रत्येक मन्त्र हेतु हमें पूर्ण विधान उपहार-स्वरूप दिया है। हम सबको इस दिव्य विधान द्वारा अपना एवं अपने देश का अभीष्ट कल्याण सिद्ध करना चाहिए। **'श्रीदुर्गा- सप्तशती'** के श्लोकों में कल्याण-कारी भाव छिपे हैं। किसी अभीष्ट कल्याण-कारी श्लोक को **'मन्त्रात्मक सप्तशती'** के विधान के अनुसार प्रत्येक श्लोक के साथ सम्पुटित कर **विशिष्ट 'अभीष्ट फल'** प्राप्त कर सकते हैं।

किसी विशिष्ट **'अभीष्ट फल'** की कामना न हो, केवल **माँ दुर्गा की कृपा** एवं **अपने कल्याण की कामना** हो, तो प्रस्तुत विधान के द्वारा **प्रति-दिन निश्चित संख्या में एक-एक मन्त्र का 'अनुष्ठान'** करने से **विशेष अनुभूतियों की प्राप्ति** होती है। यदि **'हवन'** करना सम्भव न हो, तो उसके स्थान पर दशांश **'जप'** अधिक करना चाहिए। इस प्रकार क्रमशः एक-एक **'मन्त्र'** का **'अनुष्ठान'** कर सभी **'७०० मन्त्रों'** का **'अनुष्ठान'** अकेले पूरा किया जा सकता है। जो बन्धु समर्थ हों, वे **'यज्ञ'** की भाँति इससे **'अनुष्ठान'** कर या करवा सकते हैं। १० या १० से अधिक योग्य व्यक्तियों का सहयोग लेकर सभी मन्त्रों का **'अनुष्ठान'** कुछ ही दिनों में सम्पन्न किया जा सकता है।

अन्त में यह उल्लेखनीय है कि **बाबा-श्री** के अनुसार प्रस्तुत **'मन्त्रात्मक सप्तशती'** का विधान मुख्यतः **'ऊर्ध्वाम्नायोक्त'** है। अतः इसका प्रयोग क्षुद्र कामनाओं की पूर्ति के लिए नहीं करना चाहिए। **व्यक्ति, समाज, राष्ट्र के वास्तविक कल्याण** हेतु ही इसका अनुष्ठान करना चाहिए।

* * *

प्रथम चरित-विधानं

विनियोगः— ॐ प्रथम चरितस्य श्रीब्रह्मा ऋषिः, श्रीमहा-काली देवता, गायत्री छन्दः, नन्दा शक्तिः, रक्त-दन्तिका बीजं, अग्निस्तत्त्वं, ऋग्वेदः स्वरूपं, श्रीमहा-काली-प्रीत्यर्थं जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीब्रह्मा-ऋषये नमः शिरसि, श्रीमहा-काली-देवतायै नमः हृदि, गायत्री-छन्दसे नमः मुखे, नन्दा-शक्तयै नमः नाभौ, रक्त-दन्तिका-वीजाय नमः लिङ्गे, अग्नि-तत्त्वाय नमः गुह्ये, ऋग्वेद-स्वरूपाय नमः पादौ, श्रीमहा-काली-प्रीत्यर्थं जपे विनियोगाय नमः सर्वाङ्गे।

षडङ्ग-न्यासः

	कर-न्यासः	**अङ्ग-न्यासः**
खडिगनी शूलिनी घोरा गदिनी चक्रिणी तथा, शङ्खिनी चापिनी वाण-भुशुण्डी-परिघायुधा—	अंगुष्ठाभ्यां नमः	हृदयाय नमः
शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके, घण्टा-स्वनेन नः पाहि चाप-ज्या-निःस्वनेन च—	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे, भ्रामणेनात्म-शूलस्य उत्तरस्यां तथेश्वरि—	मध्यमाभ्यां वषट्	शिखायै वषट्
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते, यानि चात्यर्थ-घोराणि तै रक्षास्मांस्तथा भुवं—	अनामिकाभ्यां हुम्	कवचाय हुम्
खड्ग-शूल-गदादीनि यानि चास्त्राणि तेऽम्बिके कर-पल्लव-सङ्गीनि तैरस्मान् रक्ष सर्वतः—	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
सर्व-स्वरूपे सर्वेशे सर्व-शक्ति-समन्विते, भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते—	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानम्— **खड्गं चक्र - गदेषु - चाप परिघांछूलं भुशुण्डीं शिरः।**
शङ्खं सन्दधतीं करैस्त्रि-नयनां सर्वाङ्ग-भूषावृताम्॥
नीलाश्म-द्युतिमास्य-पाद-दशकां सेवे महा-कालिकाम्।
यामस्तौत् स्वपिते हरो कमलजो हन्तुं मधुं कैटभम्॥

दक्षिणाम्नाय-मते आयुधानि : दक्षिण-करे—खड्ग, चक्र, गदा, इषु, चाप।
वाम-करे—परिघ, शूल, भुशुण्डी, शिरः, शङ्ख।

ऊर्ध्वाम्नाय-मते आयुधानि : दक्षिण-करे—खड्ग, गदा, चाप, शूल, शिरः।
वाम-करे—चक्र, इषु, परिघ, भुशुण्डी, शङ्ख।

* * *

ॐ ह्रीं श्रीसरस्वत्यै नमः। श्रीगणेशाय नमः। श्रीआदि-नाथाय नमः।

प्रथम चरित (मधु-कैटभ-वधः)

प्रथम अध्याय

१

विनियोगः — ॐ अस्य श्री **'मार्कण्डेय उवाच'** इति सप्तशती-प्रथम-मन्त्रस्य श्रीमहर्षि वेदव्यास ऋषिः, भगवान् श्रीसदाशिवः देवता, श्रीं बीजं, जगद्धात्री शक्तिः, भुवनेश्वरी महा-विद्या, रजो गुणः, रसना ज्ञानेन्द्रियं, वैराग्यो रसः, वाक् कर्मेन्द्रियं, मध्यम स्वरं, भू तत्त्वं, विद्या कला, ब्रूं उत्कीलनं, प्रवाहिनी मुद्रा, मम★ क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त प्रथम-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीवेदव्यास-ऋषये नमः सहस्रारे—शिरसि, भगवान् श्रीसदाशिव-देवाय नमः द्वादशारे— हृदि, श्रीं बीजाय नमः षडारे— लिङ्गे★★, जगद्धात्री-शक्त्यै नमः दशारे— नाभौ, भुवनेश्वरी-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, रसना-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, वैराग्य-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः कर्मेन्द्रिये, मध्यम-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, ब्रूं उत्कीलनाय नमः पादयोः, प्रवाहिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त प्रथम-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमो	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमो	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
श्रीं नमो	मध्यमाभ्यां वषट्	शिखायै वषट्
नमो नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ ऐं श्रीं नमः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
मार्कण्डेय उवाच	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं—**ध्यायेन्नित्यं महेशं रजत-गिरि-निभं चारु-चन्द्रावतंसम्।**
रत्नाकल्पोज्ज्वलाङ्गं परशु - मृग - वराभीति-हस्तं प्रसन्नम्॥
पद्मासीनं समन्तात् स्तुतममर-गणैर्व्याघ्र-कृत्तिं वसानम्।
विश्वाद्यं विश्व-वन्द्यं निखिल-भय-हरं पञ्च-वक्त्रं त्रिनेत्रम्॥

ॐ ऐं श्रीं नमः मार्कण्डेय उवाच नमो श्रीं ऐं ॐ॥१॥

१००० जपात् सिद्धिः, गुड-तिल-घृतेन दशांश होमः।

★ यदि कोई अन्य व्यक्ति अनुष्ठान करे, तो यहाँ **'मम यजमानस्य'** की योजना करें।

★★ स्त्री-साधिकाएँ **'श्रीं रजसे नमः षडारे योनौ'** कहें। आगे भी ध्यान रखें।

२

विनियोगः — ॐ अस्य श्री **'सावर्णिः सूर्य-तनयो'** इति सप्तशती-द्वितीय-मन्त्रस्य श्रीमार्कण्डेय ऋषिः, भगवान् श्रीसूर्यनारायणो देवता, ह्रीं बीजं, ज्योतिः शक्तिः, छिन्नमस्ता महा-विद्या, रजो गुणः, श्रोत्र ज्ञानेन्द्रियं, शान्त रसः, वाक् कर्मेन्द्रियं, प्रश्न स्वरं, भू तत्त्वं, विद्या कला, ह्रीं उत्कीलनं, सङ्कोचिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-द्वितीय-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीमार्कण्डेय-ऋषये नमः सहस्रारे—शिरसि, भगवान् श्रीसूर्य-नारायण-देवतायै नमः द्वादशारे—हृदि, ह्रीं वीजाय नमः षडारे— लिङ्गे, ज्योति-शक्त्यै नमः दशारे— नाभौ, छिन्नमस्ता-महा-विद्यायै नमः षोडशारे— कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, श्रोत्र-ज्ञानेन्द्रियाय नमः— ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः कर्मेन्द्रिये, प्रश्न-स्वराय नमः— कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे— गुदे, विद्या-कलायै नमः करतले, ह्रीं उत्कीलनाय नमः पादयोः, सङ्कोचिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-द्वितीय-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं ह्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
सावर्णिः सूर्य-तनयो	मध्यमाभ्यां वषट्	शिखायै वषट्
यो मनुः कथ्यतेऽष्टमः	अनामिकाभ्यां हुम्	कवचाय हुम्
निशामय तदुत्पत्तिं	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
विस्तराद् गदतो मम	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

(ध्येयः सदा सवितृ-मण्डल-मध्य-वर्ती)

ध्यानं— **भास्वद्-रत्नाढ्य-मौलिः स्फुरदधर-रुचा रञ्जितश्चारु-केशो।**
भास्वान्यो दिव्य-तेजाः कर-कमल-युतः स्वर्ण-वर्णः प्रभाभिः॥
विश्वाकाशावकाशो ग्रह - गण-सहितो भाति यश्चोदयाद्रौ।
सर्वानन्द - प्रदाता हरि - हर - नमितः पातु मां विश्व-चक्षुः॥

ॐ ऐं ह्रीं नमः सावर्णिः सूर्य-तनयो, यो मनुः कथ्यतेऽष्टमः।
निशामय तदुत्पत्तिं, विस्तराद् गदतो मम नमो ह्रीं ऐं ॐ॥२॥

१००० जपात् सिद्धिः, शर्करा-तिल-घृतेन दशांश होमः।

* * *

३

विनियोगः — ॐ अस्य श्री **'महा-मायाऽनुभावेन'** इति सप्तशती-तृतीय-मन्त्रस्य श्रीमार्कण्डेय ऋषिः, भगवान् श्रीसूर्य-नारायणो देवता, क्लीं वीजं, ज्योतिः शक्तिः, छिन्नमस्ता महा-विद्या, रजो गुणः, श्रोत्र ज्ञानेन्द्रियं, शान्त रसः, वाक् कर्मेन्द्रियं, प्रश्न स्वरं, भू तत्त्वं, विद्या कला, ह्रीं उत्कीलनं, सङ्कोचिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-तृतीय-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमार्कण्डेय-ऋषये नमः सहस्रारे—शिरसि, भगवान् श्रीसूर्य-नारायण-देवतायै नमः द्वादशारे—हृदि, क्लीं वीजाय नमः षडारे—लिङ्गे, ज्योति-शक्त्यै नमः दशारे— नाभौ, छिन्नमस्ता-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, श्रोत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः कर्मेन्द्रिये, प्रश्न-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे —गुदे, विद्या-कलायै नमः करतले, ह्रीं उत्कीलनाय नमः पादयोः, सङ्कोचिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-तृतीय- मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं क्लीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
महा-मायाऽनुभावेन	मध्यमाभ्यां वषट्	शिखायै वषट्
यथा मन्वन्तराधिपः	अनामिकाभ्यां हुम्	कवचाय हुम्
स बभूव महा-भागः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
सावर्णिस्तनयो रवेः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **भास्वद्-रत्नाढ्य-मौलिः स्फुरदधर-रुचा रञ्जितश्चारु-केशो।**
भास्वान्यो दिव्य-तेजाः कर-कमल-युतः स्वर्ण-वर्णः प्रभाभिः।।
विश्वाकाशावकाशो ग्रह - गण-सहितो भाति यश्चोदयाद्रौ।
सर्वानन्द - प्रदाता हरि - हर - नमितः पातु मां विश्व-चक्षुः।।

ॐ ऐं क्लीं नमः महा-मायाऽनुभावेन, यथा मन्वन्तराधिपः।
स बभूव महा-भागः, सावर्णिस्तनयो रवेः नमो क्लीं ऐं ॐ।।३।।

१००० जपात् सिद्धिः, शर्करा-तिल-घृतेन दशांश होमः।

* * *

४

विनियोगः — ॐ अस्य श्री **'स्वारोचिषेऽन्तरे'** इति सप्तशती-चतुर्थ-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहाकाली देवता, श्रीं वीजं, पद्मावती शक्तिः, दक्षिणा काली महा-विद्या, तमो गुणः, त्वक् ज्ञानेन्द्रियं, शान्त रसः, वाक् कर्मेन्द्रियं, मध्यम स्वरं, आकाश-तत्त्वं, शान्ति कला, क्रीं उत्कीलनं, द्राविणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थ श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे—शिरसि, श्रीमहाकाली-देवतायै नमः द्वादशारे —हृदि, श्रीं वीजाय नमः षडारे—लिङ्गे, पद्मावती-शक्त्यै नमः दशारे— नाभौ, दक्षिणा काली महा-विद्यायै नमः षोडशारे— कण्ठे, तमो-गुणाय नमः अन्तरारे— मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः कर्मेन्द्रिये, मध्यम-स्वराय नमः कण्ठ-मूले, आकाश तत्त्वाय नमः चतुरारे—गुदे, शान्ति-कलायै नमः करतले, क्रीं उत्कीलनाय नमः पादयोः, द्राविणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं श्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
स्वारोचिषेऽन्तरे पूर्वं	मध्यमाभ्यां वषट्	शिखायै वषट्
चैत्र-वंश-समुद्भवः	अनामिकाभ्यां हुम्	कवचाय हुम्
सुरथो नाम राजाऽभूत्	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
समस्ते क्षिति-मण्डले	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **खड्गं चक्र - गदेषु-चाप-परिघान् शूलं भुशुण्डीं शिरः।**
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्ग-भूषावृताम्।।
नीलाश्म-द्युतिमास्य-पाद-दशकां सेवे महा-कालिकाम्।
यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्।।

ॐ ऐं श्रीं नमः स्वारोचिषेऽन्तरे पूर्वं, चैत्र - वंश-समुद्भवः।
सुरथो नाम राजाऽभूत्, समस्ते क्षिति-मण्डले नमो श्रीं ऐं ॐ ।।४।।

१००० जपात् सिद्धिः, पायस-होमः।

* * *

५

विनियोगः — ॐ अस्य श्री **'तस्य पालयतः'** इति सप्तशती-पञ्चम-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहा-लक्ष्मी देवता, प्रीं बीजं, चूडामणि शक्तिः, लक्ष्मी महा-विद्या, सत्व गुणः, नेत्र ज्ञानेन्द्रियं, सौम्य रसः, कर कर्मेन्द्रियं, मध्यम स्वरं, जल तत्त्वं, प्रतिष्ठा कला, श्रीं उत्कीलनं, मोहिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-पञ्चम-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीब्रह्मा-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-लक्ष्मी-देवतायै नमः द्वादशारे—हृदि, प्रीं वीजाय नमः षडारे—लिङ्गे, चूडा-मणि-शक्त्यै नमः दशारे—नाभौ, लक्ष्मी महा-विद्यायै नमः षोडशारे—कण्ठे, सत्व-गुणाय नमः अन्तरारे—मनसि, नेत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, सौम्य-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर्मेन्द्रिये, मध्यम-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे— गुदे, प्रतिष्ठा-कलायै नमः करतले, श्रीं उत्कीलनाय नमः पादयोः, मोहिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-पञ्चम-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं प्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
तस्य पालयतः सम्यक्	मध्यमाभ्यां वषट्	शिखायै वषट्
प्रजाः पुत्रानिवौरसान्	अनामिकाभ्यां हुम्	कवचाय हुम्
बभूवुः शत्रवो भूपाः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
कोला-विध्वंसिनस्तदा	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं—**कान्त्या काञ्चन-सन्निभां हिम-गिरि-प्रख्यैश्चतुर्भिर्गजैः।**

हस्तोत्क्षिप्त - हिरण्मयामृत - घटैरासिच्य-मानां श्रियम्॥

बिभ्राणां वरमब्ज-युग्ममभयं हस्तैः किरीटोज्ज्वलाम्।

क्षौमाबद्ध-नितम्ब-बिम्ब- वलितां वन्देऽरविन्द-स्थिताम्॥

ॐ ऐं प्रीं नमः तस्य पालयतः सम्यक्, प्रजाः पुत्रानिवौरसान्।

बभूवुः शत्रवो भूपाः, कोला - विध्वंसिनस्तदा नमो प्रीं ऐं ॐ॥५॥

१००० जपात् सिद्धिः, पायस होमः।

* * *

६

विनियोगः — ॐ अस्य श्री **'तस्य तैरभवद् युद्धं'** इति सप्तशती-षष्ठ-मन्त्रस्य श्रीवेदव्यास ऋषिः, श्रीवामा काली देवता, ह्रां वीजं, ज्वालामुखी शक्तिः, श्मशान-काली महा-विद्या, तमो गुणः, घ्राण ज्ञानेन्द्रियं, उग्र रसः, कर कर्मेन्द्रियं, तीव्र स्वरं, अग्नि तत्त्वं, निवृत्ति कला, क्रीं ह्रीं उत्कीलनं, प्लाविनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-षष्ठ-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीवेदव्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीवामा-काली-देवतायै नमः द्वादशारे— हृदि, ह्रां वीजाय नमः षडारे— लिङ्गे, ज्वालामुखी-शक्त्यै नमः दशारे— नाभौ, श्मशान-काली महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे— मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, उग्र-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे—गुदे, निवृत्ति-कलायै नमः करतले, क्रीं ह्रीं उत्कीलनाय नमः पादयोः, प्लाविनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम पुटितोक्त-षष्ठ-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं ह्रां	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ नमो नमः	तर्जनीभ्यां स्वाहाः	शिरसे स्वाहा
तस्य तैरभवद् युद्धं	मध्यमाभ्यां वषट्	शिखायै वषट्
अति-प्रबल-दण्डिनः	अनामिकाभ्यां हुम्	कवचाय हुम्
न्यूनैरपि स तैर्युद्धे	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
कोला-विध्वंसिभिर्जितः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **मेघाङ्गीं शशि-शेखरां त्रि-नयनामानन्द-संवर्द्धिनीम्।**
नग्नां वा नृकरां वरां शव-शिवारूढाति-तीव्रा रतिं॥
कालस्यावृत्यांकुशं प्रमथतीं सव्ये ह्यभीतिं वरम्।
दक्षाधोर्ध्व-कराम्बुजे नर-शिरः खड्गं वहन्तीं भजे॥

ॐ ऐं ह्रां नमः तस्य तैरभवद् युद्धमति-प्रबल - दण्डिनः।
न्यूनैरपि स तैर्युद्धे कोला-विध्वंसिभिर्जितः नमो ह्रां ऐं ॐ॥६॥

१००० जपात् सिद्धिः, तिल-घृत-होमः।

* * *

७

विनियोगः — ॐ अस्य श्री **'ततः स्व-पुरमायातो'** इति सप्तशती-सप्तम-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहा-सरस्वती देवता, ह्रीं बीजं, छत्रेश्वरी शक्तिः, तारा महा-विद्या, रजो-गुणः, त्वक् ज्ञानेन्द्रियं, उद्वेग रसं, पद कर्मेन्द्रियं, मध्यम स्वरं, जल तत्त्वं, प्रवृत्ति कला, ऐं उत्कीलनं, गालिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम - पुटितोक्त-सप्तम-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, ह्रीं वीजाय नमः षडारे— लिङ्गे, छत्रेश्वरी-शक्त्यै नमः दशारे— नाभौ, तारा महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे—मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, उद्वेग-रसाय नमः चेतसि, पद-कर्मेन्द्रियाय नमः पद-कर्मेन्द्रिये, मध्यम-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे—गुदे, प्रवृत्ति-कलायै नमः करतले, ऐं उत्कीलनाय नमः पादयोः, गालिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम - पुटितोक्त-सप्तम-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं ह्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ततः स्व-पुरमायातो	मध्यमाभ्यां वषट्	शिखायै वषट्
निज-देशाधिपोऽभवत्	अनामिकाभ्यां हुम्	कवचाय हुम्
आक्रान्तः स महा-भागः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
तैस्तदा प्रबलारिभिः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं—**घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्॥
गौरी-देह-समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि - दैत्यार्दिनीम्॥

ॐ ऐं ह्रीं नमः ततः स्व-पुरमायातो, निज-देशाधिपोऽभवत्।
आक्रान्तः स महा-भागस्तैस्तदा प्रबलारिभिः नमो ह्रीं ऐं ॐ॥७॥

१००० जपात् सिद्धिः, तिल-घृत-होमः।

* * *

८

विनियोगः — ॐ अस्य श्री **'अमात्यैर्बलिभिः'** इति सप्तशती-अष्टम-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहाकाली देवता, सौं वीजं, डाकिनी शक्तिः, छिन्नमस्ता महा-विद्या, रजो गुणः, त्वक् ज्ञानेन्द्रियं, लज्ञा रसं, लिङ्ग कर्मेन्द्रियं, मध्यम स्वरं, अग्नि तत्त्वं, निवृत्ति कला, क्रीं क्रीं उत्कीलनं, विद्रोहिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोमं-विलोम-पुटितोक्त-अष्टम-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे—शिरसि, श्रीमहाकाली-देवतायै नमः द्वादशारे—हृदि, सौं बीजाय नमः षडारे— लिङ्गे, डाकिनी शक्त्यै नमः दशारे— नाभौ, छिन्नमस्ता-महा-विद्यायै नमः षोडशारे— कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, लज्ञा-रसाय नमः चेतसि, लिङ्ग-कर्मेन्द्रियाय नमः लिङ्ग-कर्मेन्द्रिये, मध्यम-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे— गुदे, निवृत्ति-कलायै नमः करतले, क्रीं क्रीं उत्कीलनाय नमः पादयोः, विद्रोहिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-अष्टम-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं सौं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
अमात्यैर्बलिभिर्दुष्टैः	मध्यमाभ्यां वषट्	शिखायै वषट्
दुर्बलस्य दुरात्मभिः	अनामिकाभ्यां हुम्	कवचाय हुम्
कोशो बलं चापहृतं	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
तत्रापि स्व-पुरे ततः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **चर्वन्ती चास्थि - खण्डं प्रकट - कटकटा-शब्द-सङ्घातमुग्रम्।**
कुर्वाणा प्रेत-मध्ये कहह-कहकहा-हास्यमुग्रं कृशाङ्गी॥
नित्यं नित्य-प्रसक्ता डमरु-डिमि-डिमान् स्फारयन्ती मुखाब्जम्।
पायान्नश्चण्डिकेयं झझम-झमझमा जल्पमाना भ्रमन्ती॥

ॐ ऐं सौं नमः अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः।
कोषो बलं चापहृतं, तत्रापि स्व-पुरे ततः नमो सौं ऐं ॐ॥८॥

१००० जपात् सिद्धिः, छाग-मांसाभावे कूष्माण्ड-खण्ड-तिलैः सघृतेन होमः।

* * *

६

विनियोगः — ॐ अस्य श्री **'ततो मृगया-व्याजेन'** इति सप्तशती-नवम-मन्त्रस्य श्रीवेदव्यास ऋषिः, श्रीमहालक्ष्मी देवता, प्रें बीजं, अभेद्या शक्तिः, सुन्दरी महा-विद्या, तमो गुणः, श्रोत्र ज्ञानेन्द्रियं, घृणा रसं, गुदं कर्मेन्द्रियं, मध्यम स्वरं, वायु तत्त्वं, विद्या कला, प्रूं उत्कीलनं, गोप्त्री मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-नवम-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीवेदव्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहालक्ष्मी-देवतायै नमः द्वादशारे— हृदि, प्रें वीजाय नमः षडारे— लिङ्गे, अभेद्या-शक्त्यै नमः दशारे—नाभौ, सुन्दरी-महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे—मनसि, श्रोत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, घृणा-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, मध्यम-स्वराय नमः कण्ठ-मूले, वायु-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः करतले, प्रूं उत्कीलनाय नमः पादयोः, गोप्त्री-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-नवम-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं प्रें	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ततो मृगया-व्याजेन	मध्यमाभ्यां वषट्	शिखायै वषट्
हृत-स्वाम्यः स भू-पतिः	अनामिकाभ्यां हुम्	कवचाय हुम्
एकाकी हयमारुह्य	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
जगाम गहनं वनम्	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **जयतु जयतु देवी देव-सङ्घाभि-पूज्या।**

जयतु जयतु भद्रा भार्गवी भाग्य-रूपा॥

जयतु जयतु सत्या सर्व-भूतान्तरस्था।

कर-पद-हृदयस्था लुब्ध-चित्ता भजेऽहम्॥

ॐ ऐं प्रें नमः ततो मृगया-व्याजेन, हृत-स्वाम्यः स भू-पतिः।

एकाकी हयमारुह्य, जगाम गहनं वनं नमो प्रें ऐं ॐ॥९॥

१००० जपात् सिद्धिः, तिल-घृत-होमः।

* * *

१०

विनियोगः — ॐ अस्य श्री **'स तत्राश्रममद्राक्षीद्'** इति सप्तशती-दशम-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहा-सरस्वती देवता, म्रें बीजं, धर्म-धारिणी शक्तिः, श्रीभैरवी महा-विद्या, सत्व गुणं, नेत्र ज्ञानेन्द्रियं, आशा रसं, वाक् कर्मेन्द्रियं, मध्यम स्वरं, वायुः तत्त्वं, शान्तिः कला, द्रां उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-दशम-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, म्रें बीजाय नमः षडारे— लिङ्गे, धर्म-धारिणी-शक्त्यै नमः दशारे— नाभौ, श्रीभैरवी-महा-विद्यायै नमः षोडशारे— कण्ठे, सत्व-गुणाय नमः अन्तरारे— मनसि, नेत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, आशा-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, मध्यम-स्वराय नमः कण्ठ-मूले, वायु-तत्त्वाय नमः चतुरारे—गुदे, शान्ति-कलायै नमः करतले, द्रां उत्कीलनाय नमः पादयोः, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव- वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-दशम-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं म्रें	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
स तत्राश्रममद्राक्षीद्	मध्यमाभ्यां वषट्	शिखायै वषट्
द्विज-वर्यस्य मेधसः	अनामिकाभ्यां हुम्	कवचाय हुम्
प्रशान्त-श्वापदाकीर्णं	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
मुनि-शिष्योप-शोभितं	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्॥
गौरी - देह - समुद्भवां त्रिजगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि - दैत्यार्दिनीम्॥

ॐ ऐं म्रें नमः स तत्राश्रममद्राक्षीद्, द्विज-वर्यस्य मेधसः।
प्रशान्त-श्वापदाकीर्णं, मुनि-शिष्योप-शोभितं नमो म्रें ऐं ॐ॥१०॥

१००० जपात् सिद्धि, तिल-घृत-होमः।

* * *

११

विनियोगः — ॐ अस्य श्री **'तस्थौ कञ्चित् स कालं'** इति सप्तशती-एकादश-मन्त्रस्य श्रीनारद ऋषिः, श्रीमहालक्ष्मी देवता, ल्हीं वीजं, धर्म-चारिणी शक्तिः, कमला महा-विद्या, सत्त्व गुणः, घ्राण ज्ञानेन्द्रियं, सौम्य रसः, पाद कर्मेन्द्रियं, शान्त स्वरं, भू तत्त्वं, प्रवृत्ति कला, श्रीं उत्कीलनं, धेनु मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमोयुत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-एकादश-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीनारद-ऋषये नमः सहस्रारे—शिरसि, श्रीमहालक्ष्मी-देवतायै नमः द्वादशारे हृदि, ल्हीं वीजाय नमः षडारे— लिङ्गे, धर्म-चारिणी-शक्त्यै नमः दशारे— नाभौ, कमला-महाविद्यायै नमः षोडशारे—कण्ठे, सत्व-गुणाय नमः अन्तरारे—मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, सौम्य-रसाय नमः चेतसि, पाद-कर्मेन्द्रियाय नमः पाद-कर्मेन्द्रिये, शान्त-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे— गुदे, प्रवृत्ति-कलायै नमः करतले, श्रीं उत्कीलनाय नमः पादयोः, धेनु-मुद्रायै नमः सर्वांगे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमोयुत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-एकादश-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं ल्हीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
तस्थौ कञ्चित् स कालं च	मध्यमाभ्यां वषट्	शिखायै वषट्
मुनिना तेन सत्कृतः	अनामिकाभ्यां हुम्	कवचाय हुम्
इतश्चेतश्च विचरन्	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
तस्मिन् मुनि-वराश्रमे	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **अक्ष-स्रक्-परशुं गदेषु-कुलिशं पद्मं धनुः कुण्डिकाम्।**
दण्डं शक्तिमसिं च चर्म-जलजं घण्टां सुरा-भाजनम्॥
शूलं पाश - सुदर्शने च दधतीं हस्तैः प्रवाल-प्रभाम्।
सेवे सैरिभ-मर्दिनीमिह महा-लक्ष्मीं सरोज-स्थिताम्॥

ॐ ऐं ल्हीं नमः तस्थौ कञ्चित् स कालं च, मुनिना तेन सत्कृतः।
इतश्चेतश्च विचरंस्तस्मिन् मुनि - वराश्रमे नमो ल्हीं ऐं ॐ॥११॥

१००० जपात् सिद्धिः, कुंकुम-पायसैः होमः।

* * *

१२

विनियोगः — ॐ अस्य श्री **'सोऽचिन्तयत्तदा'** इति सप्तशती-द्वादश-मन्त्रस्य श्रीवेदव्यास ऋषिः, श्रीमहाकाली देवता, म्लीं वीजं, हाकिनी शक्तिः, धूमा महाविद्या, रजो गुणः, त्वक् ज्ञानेन्द्रियं, गाम्भीर्य रसः, गुद कर्मेन्द्रियं, गम्भीर स्वरं, जल तत्त्वं, निवृत्ति कला, धूँ उत्कीलनं, मत्स्य मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्धयर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्धयर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-द्वादश-मन्त्र- जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीवेदव्यास-ऋषये नमः सहस्रारे— शिरसि, श्रीमहाकाली-देवतायै नमः द्वादशारे— हृदि, म्लीं वीजाय नमः षडारे— लिङ्गे, हाकिनी-शक्त्यै नमः दशारे— नाभौ, धूमा-महा-विद्यायै नमः षोडशारे— कण्ठे, रजो-गुणाय नमः अन्तरारे—मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, गाम्भीर्य-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, गम्भीर-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे— गुदे, निवृत्ति-कलायै नमः करतले, धूँ उत्कीलनाय नमः पादयोः, मत्स्य-मुद्रायै नमः सर्वांगे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्धयर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्धयर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-द्वादश-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ 'ऐं म्लीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
सोऽचिन्तयत् तदा तत्र	मध्यमाभ्यां वषट्	शिखायै वषट्
ममत्वाकृष्ट-चेतनः	अनामिकाभ्यां हुम्	कवचाय हुम्
मत्पूर्वैः पालितं पूर्वं	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
मया हीनं पुरं हि तत्	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **वामे कर्णे मृगाङ्कं प्रलय-परिगतं दक्षिणे सूर्य-बिम्बम्।**
कण्ठे नक्षत्र-हारं वर-विकट-जटा-जूटके मुण्डमालाम्॥
स्कन्धे कृत्वोरगेन्द्र-ध्वज-निकर-युतं ब्रह्म-कङ्काल-भारम्।
संहारे धारयन्ती मम हरतु भयं भद्रदा भद्रकाली॥

ॐ ऐं म्लीं नमः सोऽचिन्तयत् तदा तत्र, ममत्वाकृष्ट-चेतनः।
मत्पूर्वैः पालितं पूर्वं, मया हीनं पुरं हि तत् नमो म्लीं ऐं ॐ॥१२॥

१००० जपः, सर्षप-तिलैश्च होमः।

* * *

१३

विनियोगः — ॐ अस्य श्री **'मद्-भृत्यैस्तैः'** इति सप्तशती-त्रयोदश-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहाकाली देवता, स्त्रीं बीजं, शाकिनी शक्तिः, धूमा महाविद्या, रजो गुणः, त्वक् ज्ञानेन्द्रियं, गाम्भीर्य रसः, गुदं कर्मेन्द्रियं, गम्भीर स्वरं, जल तत्त्वं, निवृत्ति कला, धूं उत्कीलनं, मत्स्य मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-त्रयोदश-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे—शिरसि, श्रीमहाकाली-देवतायै नमः द्वादशारे—हृदि, स्त्रीं वीजाय नमः षडारे— लिङ्गे, शाकिनी-शक्त्यै नमः दशारे— नाभौ, धूमा-महा-विद्यायै नमः षोडशारे— कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, गाम्भीर्य-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, गम्भीर-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे— गुदे, निवृत्ति-कलायै नमः करतले, धूं उत्कीलनाय नमः पादयोः, मत्स्य-मुद्रायै नमः सर्वांगे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-त्रयोदश-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं स्त्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
मद्-भृत्यैस्तैरसद्-वृत्तैः	मध्यमाभ्यां वषट्	शिखायै वषट्
धर्मतः पाल्यते न वा	अनामिकाभ्यां हुम्	कवचाय हुम्
न जाने स प्रधानो मे	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
शूर-हस्ती सदा-मदः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **धूम्राभां धूम्र-वस्त्रां प्रकटित-दशनां मुक्ता-बालाम्बराढ्याम्।**
काकाङ्क-स्यन्दनस्थां धवल-कर-युगां शूर्प-हस्तातिरूक्षाम्॥
नित्यं क्षुत्क्षाम-देहां रजत-रज-युतामन्तरश्शान्त-चित्ताम्।
ध्यायेद् धूमावतीं वाम-नयन-युगलां भीतिदां भीषणास्याम्॥

ॐ ऐं स्त्रीं नमः मद्-भृत्यैस्तैरसद्-वृत्तैः, धर्मतः पाल्यते न वा।
न जाने स प्रधानो मे, शूर-हस्ती सदा-मदः नमो स्त्रीं ऐं ॐ॥१३॥

१००० जपात् सिद्धिः, सर्षप-तिलैश्च दशांश होमः।

* * *

१४

विनियोगः — ॐ अस्य श्री **'मम वैरि-वशं यातः'** इति सप्तशती-चतुर्दश-मन्त्रस्य श्री महर्षि वेदव्यास ऋषिः, श्रीमहालक्ष्मी देवता, क्रां वीजं, दया शक्तिः, पीताम्बरा महा-विद्या, रजो-गुणः, त्वक् ज्ञानेन्द्रियं, गाम्भीर्य रसः, गुद कर्मेन्द्रियं, गम्भीर स्वरं, भू तत्त्वं, प्रवृत्तिः कला, ल्हीं उत्कीलनं, धेनु मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-बीज-लोम-विलोम-पुटितोक्त-चतुर्दश-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीवेदव्यास-ऋषये नमः सहस्रारे— शिरसि, श्रीमहालक्ष्मी-देवतायै नमः द्वादशारे—हृदि, क्रां वीजाय नमः षडारे—लिङ्गे, दया-शक्त्यै नमः दशारे— नाभौ, पीताम्बरा-महा-विद्यायै नमः षोडशारे— कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, गाम्भीर्य-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः कर्मेन्द्रिये, गम्भीर-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे— गुदे, प्रवृत्ति-कलायै नमः कर-तले, ल्हीं उत्कीलनाय नमः पादयोः, धेनु-मुद्रायै नमः सर्वांगे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्वबीज-लोम-विलोम-पुटितोक्त-चतुर्दश-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं क्रां	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
मम वैरि-वशं यातः	मध्यमाभ्यां वषट्	शिखायै वषट्
कान् भोगानुप-लप्स्यते	अनामिकाभ्यां हुम्	कवचाय हुम्
ये ममानुगता नित्यं	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
प्रसाद-धन-भोजनैः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **पीताम्बरां पीत-माल्यां, पीताभरण-भूषिताम्।**
पीत-कञ्ज-पद-द्वन्द्वां, कमलां चिन्तयेऽनिशम्॥

ॐ ऐं क्रां नमः मम वैरि-वशं यातः, कान् भोगानुप-लप्स्यते।
ये ममानुगता नित्यं, प्रसाद - धन-भोजनैः नमो क्रां ऐं ॐ॥१४॥

१००० जपात्सिद्धिः, पायस-घृत-तिलैः हरिद्रया च दशांश होमः।

* * *

१५

विनियोगः — ॐ अस्य श्री **'अनुवृत्तिं ध्रुवं'** इति सप्तशती-पञ्चदश-मन्त्रस्य श्री ब्रह्मा ऋषिः, श्रीमहालक्ष्मी देवता, स्त्हीं बीजं, हस्तिनी शक्तिः, मातङ्गी महा-विद्या, तमो गुणः, चक्षुः ज्ञानेन्द्रियं, द्वेषो रसः, लिङ्ग कर्मेन्द्रियं, सौम्य स्वरं, भूं तत्त्वं, प्रवृत्तिः कला, ह्रीं वृं उत्कीलनं, धेनु मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-पञ्चदश-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे— शिरसि, श्रीमहालक्ष्मी-देवतायै नमः द्वादशारे— हृदि, स्त्हीं वीजाय नमः षडारे— लिङ्गे, हस्तिनी-शक्त्यै नमः दशारे— नाभौ, मातङ्गी-महा-विद्यायै नमः षोडशारे— कण्ठे, तमो-गुणाय नमः अन्तरारे— मनसि, चक्षुः-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, द्वेष-रसाय नमः चेतसि, लिङ्ग-कर्मेन्द्रियाय नमः कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे— गुदे, प्रवृत्ति-कलायै नमः करतले, ह्रीं वृं उत्कीलनाय नमः पादयोः, धेनु-मुद्रायै नमः सर्वांगे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-पञ्चदश-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं स्त्हीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
अनुवृत्तिं ध्रुवं तेऽद्य	मध्यमाभ्यां वषट्	शिखायै वषट्
कुर्वन्त्यन्य-मही-भृतां	अनामिकाभ्यां हुम्	कवचाय हुम्
असम्यग्-व्यय-शीलैस्तैः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
कुर्वद्भिः सततं व्ययम्	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **कान्त्या काञ्चन-सन्निभां हिम-गिरि-प्रख्यैश्चतुर्भिर्गजैः।**

हस्तोत्क्षिप्त - हिरण्मयामृत-घटैरासिच्य-मानां श्रियम्॥

विभ्राणां वरमब्ज-युग्ममभयं हस्तैः किरीटोज्ज्वलाम्।

क्षौमाबद्ध-नितम्ब-बिम्ब-वलितां वन्देऽरविन्द-स्थिताम्॥

ॐ ऐं स्त्हीं नमः अनुवृत्तिं ध्रुवं तेऽद्य, कुर्वन्त्यन्य - मही-भृतां।

असम्यग्-व्यय-शीलैस्तैः, कुर्वद्भिः सततं व्ययं नमो स्त्हीं ऐं ॐ॥१५॥

१००० जपात् सिद्धिः, पलाश-समिध-घृतेन दशांश होमः।

* * *

१६

विनियोगः — ॐ अस्य श्री **'सञ्चितः सोऽति-दुःखेन'** इति सप्तशती-षोडश-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्री महालक्ष्मी देवता, क्रीं बीजं, क्षेमङ्करी शक्तिः, बगला महा-विद्या, तमो गुणः, श्रोत्र ज्ञानेन्द्रियं, द्वेषो रसः, लिङ्ग कर्मेन्द्रियं, सौम्य स्वरं, जल तत्त्वं, निवृत्तिः कला, ल्हीं उत्कीलनं, योनि मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-षोडश-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे— शिरसि, श्रीमहालक्ष्मी-देवतायै नमः द्वादशारे— हृदि, क्रीं वीजाय नमः षडारे— लिङ्गे, क्षेमङ्करी-शक्त्यै नमः दशारे— नाभौ, बगला-महा-विद्यायै नमः षोडशारे— कण्ठे, तमो-गुणाय नमः अन्तरारे—मनसि, श्रोत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, द्वेष-रसाय नमः चेतसि, लिङ्ग-कर्मेन्द्रियाय नमः कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, जल-तत्वाय नमः चतुरारे— गुदे, निवृत्ति-कलायै नमः करतले, ल्हीं उत्कीलनाय नमः पादयोः, योनि-मुद्रायै नमः सर्वांगे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-षोडश-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं क्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
सञ्चितः सोऽति-दुःखेन	मध्यमाभ्यां वषट्	शिखायै वषट्
क्षयं कोषो गमिष्यति	अनामिकाभ्यां हुम्	कवचाय हुम्
एतद्यान्यच्च सततं	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
चिन्तयामास पार्थिवः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **कान्त्या काञ्चन-सन्निभां हिम-गिरि-प्रख्यैश्चतुर्भिर्गजैः।**
हस्तोत्क्षिप्त - हिरण्मयामृत-घटैरासिच्य-मानां श्रियम्॥
विभ्राणां वरमब्ज-युग्ममभयं हस्तैः किरीटोज्ज्वलाम्।
क्षौमाबद्ध-नितम्ब-बिम्ब-वलितां वन्देऽरविन्द-स्थिताम्॥

ॐ ऐं क्रीं नमः सञ्चितः सोऽति-दुःखेन, क्षयं कोषो गमिष्यति।
एतद्यान्यच्च सततं, चिन्तयामास पार्थिवः नमो क्रीं ऐं ॐ॥१६॥

१००० जपात् सिद्धिः, पायस होमः।

* * *

१७

विनियोगः — ॐ अस्य श्री **'तत्र विप्राश्रमाभ्यासे'** इति सप्तशती-सप्तदश-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहासरस्वती देवता, चां बीजं, वैप्रचित्ता शक्तिः, तारा महाविद्या, रजो-गुणः, चक्षुः ज्ञानेन्द्रियं, मृदु रसं, कर कर्मेन्द्रियं, मृदु स्वरं, जल तत्त्वं, प्रतिष्ठा कला, स्त्रीं उत्कीलनं, आवाहिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तदश-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे— शिरसि, श्रीमहासरस्वती-देवतायै नमः द्वादशारे— हृदि, चां वीजाय नमः षडारे— लिङ्गे, वैप्रचित्ता-शक्त्यै नमः दशारे— नाभौ, तारा महा-विद्यायै नमः षोडशारे— कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, चक्षुः-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, मृदु-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे— गुदे, प्रतिष्ठा-कलायै नमः करतले, स्त्रीं उत्कीलनाय नमः पादयोः, आवाहिनी-मुद्रायै नमः सर्वांगे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-सप्तदश-मन्त्र-जपे विनियोगाय नम अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं चां	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
तत्र विप्राश्रमाभ्यासे	मध्यमाभ्यां वषट्	शिखायै वषट्
वैश्यमेकं ददर्श सः	अनामिकाभ्यां हुम्	कवचाय हुम्
स पृष्टस्तेन कस्त्वं भो	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
हेतुश्चागमनेऽत्र कः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्॥
गौरी - देह-समुद्भवां त्रिजगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि-दैत्यार्दिनीम्॥

ॐ ऐं चां नमः तत्र विप्राश्रमाभ्यासे, वैश्यमेकं ददर्श सः।
स पृष्टस्तेन कस्त्वं भो, हेतुश्चागमनेऽत्र कः नमो चां ऐं ॐ॥१७॥

१००० जपात् सिद्धिः, घृत-पायस-होमः।

* * *

१८

विनियोगः — ॐ अस्य श्री **'स-शोक इव'** इति सप्तशती-अष्टादश-मन्त्रस्य श्रीनारद ऋषिः, श्रीमहाकाली देवता, भें वीजं, वैप्रचित्ता शक्तिः, श्रीकाली महा-विद्या, तमो गुणः, घ्राण ज्ञानेन्द्रियं, करुणा रसं, गुद कर्मेन्द्रियं, मृदु स्वरं, अग्नि तत्त्वं, प्रवृत्तिः कला, द्रां उत्कीलनं, गालिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-अष्टादश-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीनारद-ऋषये नमः सहस्रारे— शिरसि, श्रीमहाकाली-देवतायै नमः द्वादशारे— हृदि, भें बीजाय नमः षडारे— लिङ्गे, वैप्रचित्ता-शक्त्यै नमः दशारे— नाभौ, श्रीकाली-महा-विद्यायै नमः षोडशारे— कण्ठे, तमो-गुणाय नमः अन्तरारे— मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, करुणा-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे— गुदे, प्रवृत्ति-कलायै नमः करतले, द्रां उत्कीलनाय नमः पादयोः, गालिनी-मुद्रायै नमः सर्वांगे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-अष्टादश-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं भें	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
स-शोक इव कस्मात् त्वं	मध्यमाभ्यां वषट्	शिखायै वषट्
दुर्मना इव लक्ष्यसे	अनामिकाभ्यां हुम्	कवचाय हुम्
इत्याकर्ण्य वचस्तस्य	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
भू-पतेः प्रणयोदितम्	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **मेघाङ्गीं शशि-शेखरां त्रि-नयनामानन्द-संवर्द्धिनीम्।**
नग्नां वा नृकरां वरां शब-शिवारूढाति-तीव्रा रतिं।।
कालस्यावृत्यांकुशं प्रमथतीं सव्ये ह्यभीतिं वरम्।
दक्षाधोर्ध्व-कराम्बुजे नर-शिरः खड्गं वहन्तीं भजे।।

ॐ ऐं भें नमः स-शोक इव कस्मात् त्वं, दुर्मना इव लक्ष्यसे।
इत्याकर्ण्य वचस्तस्य, भू - पतेः प्रणयोदितम् नमो भें ऐं ॐ।।१८।।

१००० जपात् सिद्धिः, घृत-तिल-पायस होमः।

* * *

१६

विनियोगः — ॐ अस्य श्री **'प्रत्युवाच स तं वैश्यः'** इति सप्तशती-एकोनविंशति-मन्त्रस्य श्री वेदव्यास ऋषिः, श्रीमहाकाली देवता, क्रीं वीजं, तोयदा शक्तिः, वगला महाविद्या, रजो-गुणः, श्रोत्र ज्ञानेन्द्रियं, मृदु रसं, वाक् कर्मेन्द्रियं, मृदु स्वरं, भू तत्त्वं, विद्या कला, त्रीं उत्कीलनं, प्लाविनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-एकोनविंशति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीवेदव्यास-ऋषये नमः सहस्रारे— शिरसि, श्रीमहाकाली-देवतायै नमः द्वादशारे— हृदि, क्रीं बीजाय नमः षडारे— लिङ्गे, तोयदा-शक्त्यै नमः दशारे— नाभौ, बगला-महाविद्यायै नमः षोडशारे-कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, श्रोत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, मृदु-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे— गुदे, विद्या-कलायै नमः करतले, त्रीं उत्कीलनाय नमः पादयोः, प्लाविनी-मुद्रायै नमः सर्वांगे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-एकोनविंशति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ क्रीं	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ॐ नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
ॐ ऐं क्रीं नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
प्रत्युवाच स तं वैश्यः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
प्रश्रयाव-नतो नृपम्	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **मेघाङ्गीं शशि-शेखरां त्रि-नयनामानन्द-संवर्द्धिनीम्।**

नग्नां वा नृकरां वरां शब-शिवारूढाति-तीव्रा रतिं॥

कालस्यावृत्यांकुशं प्रमथतीं सव्ये ह्यभीतिं वरम्।

दक्षाधोर्ध्व-कराम्बुजे नर-शिरः खड्गं वहन्तीं भजे॥

ॐ ऐं क्रीं नमः प्रत्युवाच स तं वैश्यः, प्रश्रयाव-नतो नृपम् नमो क्रीं ऐं ॐ॥१६॥

१००० जपात् सिद्धिः, यव-घृत-होमः।

* * *

२०

विनियोगः — ॐ अस्य श्री **'वैश्य उवाच'** इति सप्तशती-विंशति-मन्त्रस्य श्रीवेदव्यास ऋषिः, श्री महाविष्णुः देवता, वैं वीजं, महामाया शक्तिः, बगला महाविद्या, रजो गुणः, श्रोत्र ज्ञानेन्द्रियं, मृदु रसः, वाक् कर्मेन्द्रियं, सौम्य स्वरः, भू तत्त्वं, विद्या कला, व्रीं उत्कीलनं, प्रवाहिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-विंशति-मन्त्र-जपे विनियोगः।

विनियोगः — ॐ अस्य श्री **'त्वमेव सन्ध्या'** इति सप्तशती-पञ्च-सप्तत-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहाकाली देवता, क्रैं वीजं, शैल-पुत्री शक्तिः, सुन्दरी महाविद्या, तमो गुणः, घ्राण ज्ञानेन्द्रियं, स्तवन रसः, गुद कर्मेन्द्रियं, मृदु स्वरं, आकाश तत्त्वं, परा-शान्तिः कला, ह्रीं उत्कीलनं, सम्पुट मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-पञ्च-सप्तत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे— शिरसि, श्रीमहाकाली-देवतायै नमः द्वादशारे— हृदि, क्रैं बीजाय नमः षडारे— लिङ्गे, शैल-पुत्री-शक्त्यै नमः दशारे— नाभौ, सुन्दरी-महाविद्यायै नमः षोडशारे— कण्ठे, तमो-गुणाय नमः अन्तरारे— मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, स्तवन-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, आकाश-तत्त्वाय नमः चतुरारे— गुदे, परा-शान्ति-कलायै नमः करतले, ह्रीं उत्कीलनाय नमः पादयोः, सम्पुट-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-पञ्च-सप्तत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं क्रैं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
त्वमेव सन्ध्या सावित्री	मध्यमाभ्यां वषट्	शिखायै वषट्
त्वं देवि जननी परा	अनामिकाभ्यां हुम्	कवचाय हुम्
त्वयैतद् धार्यते विश्वं	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
त्वयैतत् सृज्यते जगत्	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **खड्गं चक्र - गदेषु-चाप-परिघान् शूलं भुशुण्डीं शिरः।**

शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्ग-भूषावृताम्॥

नीलाश्म-द्युतिमास्य-पाद-दशकां सेवे महा-कालिकाम्।

यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्॥

ॐ ऐं क्रैं नमः त्वमेव सन्ध्या सावित्री, त्वं देवि! जननी परा।

त्वयैतद् धार्यते विश्वं, त्वयैतत् सृज्यते जगत् नमो क्रैं ऐं ॐ॥७५॥

१००० जपात् सिद्धिः, घृत-पायस-छाग होमः।

* * *

७६

विनियोगः — ॐ अस्य श्री **'त्वयैतत् पाल्यते'** इति सप्तशती-षट्-सप्तत-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहालक्ष्मी देवता, ग्रां बीजं, ब्रह्मचारिणी शक्तिः, श्रीभुवनेश्वरी महा-विद्या, रजो-गुणः, रसना ज्ञानेन्द्रियं, स्तवन रसः, लिङ्ग कर्मेन्द्रियं, मृदु स्वरं, वायु तत्त्वं, शान्तिः कला, श्रीं उत्कीलनं, सम्पुट मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-षट्-सप्तत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे— शिरसि, श्रीमहालक्ष्मी-देवतायै नमः द्वादशारे— हृदि, ग्रां वीजाय नमः षडारे— लिङ्गे, ब्रह्मचारिणी-शक्त्यै नमः दशारे— नाभौ, श्रीभुवनेश्वरी-महा-विद्यायै नमः षोडशारे— कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, रसना-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, स्तवन-रसाय नमः चेतसि, लिङ्ग-कर्मेन्द्रियाय नमः लिङ्ग-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, वायु-तत्त्वाय नमः चतुरारे— गुदे, शान्ति-कलायै नमः करतले, श्रीं उत्कीलनाय नमः पादयोः, सम्पुट-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-षट्-सप्तत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं ग्रां	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
त्वयैतत् पाल्यते देवि	मध्यमाभ्यां वषट्	शिखायै वषट्
त्वमत्स्यन्ते च सर्वदा	अनामिकाभ्यां हुम्	कवचाय हुम्
विसृष्टौ सृष्टि-रूपा त्वं	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
स्थिति-रूपा च पालने	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **अक्ष-स्रक्-परशुं गदेषु-कुलिशं पद्मं धनुः कुण्डिकाम्,**
दण्डं शक्तिमसिं च चर्म-जलजं घण्टां सुरा-भाजनम्।
शूलं पाश-सुदर्शने च दधतीं हस्तैः प्रवाल-प्रभाम्,
सेवे सैरिभ-मर्दिनीमिह महा-लक्ष्मीं सरोज-स्थिताम्।।

ॐ ऐं ग्रां नमः त्वयैतत् पाल्यते देवि! त्वमत्स्यन्ते च सर्वदा।
विसृष्टौ सृष्टि-रूपा त्वं, स्थिति-रूपा च पालने नमो ग्रां ऐं ॐ।।७६।।

१००० जपात् सिद्धिः, घृत-पायस होमः।

* * *

७७

विनियोगः — ॐ अस्य श्री **'तथा संहृति-रूपान्ते'** इति सप्त-शती-सप्त-सप्तत-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहासरस्वती देवता, फ्रां वीजं, चन्द्र-घण्टा शक्तिः, श्रीभैरवी महा-विद्या, सतो गुणः, त्वक् ज्ञानेन्द्रियं, स्तवन रसः, कर कर्मेन्द्रियं, मृदु स्वरं, अग्निस्तत्वं, विद्या कला, ऐं उत्कीलनं, सम्पुट मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्त-सप्तत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे— शिरसि, श्रीमहासरस्वती-देवतायै नमः द्वादशारे— हृदि, फ्रां वीजाय नमः षडारे— लिङ्गे, चन्द्र-घण्टा-शक्त्यै नमः दशारे— नाभौ, श्रीभैरवी-महाविद्यायै नमः षोडशारे—कण्ठे, सतो-गुणाय नमः अन्तरारे— मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, स्तवन-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे— गुदे, विद्या-कलायै नमः करतले, ऐं उत्कीलनाय नमः पादयोः, सम्पुट-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्त-सप्तत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं फ्रां	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
तथा संहृति-रूपान्ते	मध्यमाभ्यां वषट्	शिखायै वषट्
जगतोऽस्य जगन्मये	अनामिकाभ्यां हुम्	कवचाय हुम्
महा-विद्या महा-माया	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
महा-मेधा महा-स्मृतिः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्।।
गौरी-देह-समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि - दैत्यार्दिनीम्।।

ॐ ऐं फ्रां नमः तथा संहृति-रूपान्ते, जगतोऽस्य जगन्मये!
महा-विद्या महा-माया, महा-मेधा महा-स्मृतिः नमो फ्रां ऐं ॐ।।७७।।

१००० जपात् सिद्धिः, छाग-घृत-पलाश-समित् होमः।

* * *

७८

विनियोगः — ॐ अस्य श्री **'महा-मोहा च भवती'** इति सप्तशती-अष्ट-सप्तत-मन्त्रस्य श्री ब्रह्मा ऋषिः, श्रीमहाकाली देवता, जीं वीजं, कूष्माण्डा शक्तिः, श्रीमातङ्गी महा-विद्या, तमो गुणः, नेत्र ज्ञानेन्द्रियं, स्तवन रसः, पाद कर्मेन्द्रियं, मृदु स्वरं, जल तत्त्वं, प्रतिष्ठा कला, क्रीं उत्कीलनं, सम्पुटी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-अष्ट-सप्तत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे— शिरसि, श्रीमहाकाली-देवतायै नमः द्वादशारे— हृदि, जीं वीजाय नमः षडारे— लिङ्गे, कूष्माण्डा-शक्त्यै नमः दशारे— नाभौ, श्रीमातङ्गी-महा-विद्यायै नमः षोडशारे— कण्ठे, तमो-गुणाय नमः अन्तरारे— मनसि, नेत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, स्तवन रसाय नमः चेतसि, पाद-कर्मेन्द्रियाय नमः पाद-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे— गुदे, प्रतिष्ठा-कलायै नमः करतले, क्रीं उत्कीलनाय नमः पादयोः, सम्पुटी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-अष्ट-सप्तत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं जीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
महा-मोहा च भवती	मध्यमाभ्यां वषट्	शिखायै वषट्
महा-देवी महाऽसुरी	अनामिकाभ्यां हुम्	कवचाय हुम्
प्रकृतिस्त्वं च सर्वस्य	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
गुण-त्रय-विभाविनी	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **खड्गं चक्र-गदेषु-चाप-परिघान् शूलं भुशुण्डीं शिरः।**
शङ्खं सन्दधतीं करैस्त्रि - नयनां सर्वाङ्ग-भूषावृताम्।।
नीलाश्म-द्युतिमास्य-पाद-दशकां सेवे महा-कालिकाम्।
यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्।।

ॐ ऐं जीं नमः महा-मोहा च भवती, महा-देवी महाऽसुरी।
प्रकृतिस्त्वं च सर्वस्य, गुण-त्रय-विभाविनी नमो जीं ऐं ॐ।।७८।।

१००० जपात् सिद्धिः, पायस-घृत होमः।

* * *

७९

विनियोगः — ॐ अस्य श्री **'कालिरात्रिर्महा-रात्रिः'** इति सप्तशती-एकोनाशीत-मन्त्रस्य श्री ब्रह्मा ऋषिः, श्रीमहालक्ष्मी देवता, लूं वीजं, स्कन्द-माता शक्तिः, श्रीकमला महा-विद्या, रजो गुणः, श्रोत्र ज्ञानेन्द्रियं, स्तवन रसं, वाक्-कर्मेन्द्रियं, मृदु स्वरं, भू तत्त्वं, निवृत्ति कला, श्लीं उत्कीलनं, सम्पुटी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-एकोनाशीत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे— शिरसि, श्रीमहालक्ष्मी-देवतायै नमः द्वादशारे— हृदि, लूं बीजाय नमः षडारे— लिङ्गे, स्कन्द-माता-शक्त्यै नमः दशारे— नाभौ, श्रीकमला-महा-विद्यायै नमः षोडशारे— कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, श्रोत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, स्तवन-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, भू-तत्वाय नमः चतुरारे— गुदे, निवृत्ति-कलायै नमः करतले, श्लीं उत्कीलनाय नमः पादयोः, सम्पुटी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-एकोनाशीत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं लूं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
काल-रात्रिर्महा-रात्रिः	मध्यमाभ्यां वषट्	शिखायै वषट्
मोह-रात्रिश्च दारुणा	अनामिकाभ्यां हुम्	कवचाय हुम्
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीं	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
त्वं बुद्धिर्बोध-लक्षणा	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **अक्ष-स्रक्-परशुं गदेषु-कुलिशं पद्मं धनुः कुण्डिकां,**
दण्डं शक्तिमसिं च चर्म-जलजं घण्टां सुरा-भाजनम्।
शूलं पाश-सुदर्शने च दधतीं हस्तैः प्रवाल-प्रभाम्,
सेवे सैरिभ-मर्दिनीमिह महा-लक्ष्मीं सरोज-स्थिताम्।।

ॐ ऐं लूं नमः काल-रात्रिर्महा-रात्रिः, मोह-रात्रिश्च दारुणा।
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोध-लक्षणा नमो लूं ऐं ॐ।।७९।।

१००० जपात् सिद्धिः, पायस-घृत होमः।

* * *

८०

विनियोगः — ॐ अस्य श्री **'लज्जा पुष्टिस्तथा'** इति सप्तशती-अशीति-तम-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहासरस्वती देवता, स्लूं बीजं, कात्यायनी शक्तिः, श्रीधूमा महा-विद्या, सतो गुणः, घ्राण ज्ञानेन्द्रियं, स्तवन रसः, लिङ्ग कर्मेन्द्रियं, मृदु स्वरं, आकाश-तत्त्वं, परा-शान्ति कला, ऐं उत्कीलनं, सम्पुटी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-अशीति-तम-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे— शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे— हृदि, स्लूं बीजाय नमः षडारे— लिङ्गे, कात्यायनी-शक्त्यै नमः दशारे— नाभौ, श्रीधूमा-महाविद्यायै नमः षोडशारे— कण्ठे, सतो-गुणाय नमः अन्तरारे— मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, घ्राण-रसाय नमः चेतसि, लिङ्ग-कर्मेन्द्रियाय नमः लिङ्ग-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, आकाश-तत्वाय नमः चतुरारे— गुदे, परा-शान्ति-कलायै नमः करतले, ऐं उत्कीलनाय नमः पादयोः, सम्पुटी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-अशीति-तम-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं स्लूं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
लज्जा पुष्टिस्तथा तुष्टिः	मध्यमाभ्यां वषट्	शिखायै वषट्
त्वं शान्तिः क्षान्तिरेव च	अनामिकाभ्यां हुम्	कवचाय हुम्
खड्गिनी शूलिनी घोरा	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
गदिनी चक्रिणी तथा	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **कामं फाल-तले दुरक्षरततिर्देवी ममास्तानभी-**
र्मातस्त्वत्पद-पङ्कजोत्थ-रजसा लुम्पामि तां श्चिनतिं।
मार्कण्डेय-मुनिर्यथा भव-पदाम्भोजार्चना-प्राभवात्
कालं तद्वदहं चतुर्मुख-मुखाम्भोजात् सूर्य-प्रभे॥

ॐ ऐं स्लूं नमः लज्जा पुष्टिस्तथा तुष्टिः, त्वं शान्तिः क्षान्तिरेव च।
खड्गिनी शूलिनी घोरा, गदिनी चक्रिणी तथा नमो स्लूं ऐं ॐ॥८०॥

१००० जपात् सिद्धिः, घृत-पायस-तिलैः होमः।

* * *

८१

विनियोगः — ॐ अस्य श्री **'शङ्खिनी चापिनी'** इति सप्तशती-एकाशीत-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहाकाली देवता, नों वीजं, काल-रात्रिः शक्तिः, श्रीबगलामुखी महा-विद्या, तमो गुणः, रसना ज्ञानेन्द्रियं, स्तवन रसः, गुद कर्मेन्द्रियं, मृदु स्वरं, वायुस्तत्त्वं, शान्ति कला, क्रीं उत्कीलनं, सम्पुटी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-एकाशीत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे— शिरसि, श्रीमहाकाली-देवतायै नमः द्वादशारे— हृदि, नों बीजाय नमः षडारे— लिङ्गे, काल-रात्रि-शक्त्यै नमः दशारे— नाभौ, श्रीबगलामुखी-महा-विद्यायै नमः षोडशारे— कण्ठे, तमो-गुणाय नमः अन्तरारे— मनसि, रसना-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, स्तवन-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, वायु-तत्त्वाय नमः चतुरारे— गुदे, शान्ति-कलायै नमः करतले, क्रीं उत्कीलनाय नमः पादयोः, सम्पुटी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-एकाशीत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं नों	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
शङ्खिनी चापिनी वाण	मध्यमाभ्यां वषट्	शिखायै वषट्
भुशुण्डी परिघायुधा	अनामिकाभ्यां हुम्	कवचाय हुम्
सौम्या सौम्य-तराऽशेष	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
सौम्येभ्यस्त्वति-सुन्दरी	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **मेघाङ्गीं शशि-शेखरां त्रिनयनामानन्द-संवर्द्धिनीम्।**

नग्नां वा नृकरां वरां शव-शिवारूढाति-तीव्रा रतिं॥

कालस्यावृत्यांकुशं प्रमथतीं सव्ये ह्यभीतिं वरम्।

दक्षाधोर्ध्व-कराम्बुजे नर-शिरः खड्गं वहन्तीं भजे॥

ॐ ऐं नों नमः शङ्खिनी चापिनी वाण-भुशुण्डी - परिघायुधा।

सौम्या सौम्य-तराऽशेष-सौम्येभ्यस्त्वति-सुन्दरी नमो नों ऐं ॐ॥८१॥

१००० जपात् सिद्धिः, छाग-पायस होमः।

* * *

८२

विनियोगः — ॐ अस्य श्री **'पराऽपराणां परमा'** इति सप्तशती-द्वयशीत-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहालक्ष्मी देवता, स्त्रीं वीजं, महा-गौरी शक्तिः, श्रीतारा महाविद्या, रजो गुणः, त्वक् ज्ञानेन्द्रियं, स्तवन रसः, गुद कर्मेन्द्रियं, मृदु स्वरं, अग्निः तत्त्वं, विद्या कला, श्रीं उत्कीलनं, सम्पुटी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-द्वयशीत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे— शिरसि, श्रीमहालक्ष्मी-देवतायै नमः द्वादशारे— हृदि, स्त्रीं वीजाय नमः षडारे— लिङ्गे, महा-गौरी-शक्त्यै नमः दशारे— नाभौ, श्रीतारा-महा-विद्यायै नमः षोडशारे— कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, स्तवन-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे— गुदे, विद्या-कलायै नमः करतले, श्रीं उत्कीलनाय नमः पादयोः, सम्पुटी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-द्वयशीत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं स्त्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
पराऽपराणां परमा	मध्यमाभ्यां वषट्	शिखायै वषट्
त्वमेव परमेश्वरी	अनामिकाभ्यां हुम्	कवचाय हुम्
यच्च किञ्चित् क्वचिद् वस्तु	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
सदसद् वाऽखिलात्मिके	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **अक्ष-स्रक्-परशुं गदेषु-कुलिशं पद्मं धनुः कुण्डिकाम्,**
दण्डं शक्तिमसिं च चर्म-जलजं घण्टां सुरा-भाजनं।
शूलं पाश-सुदर्शने च दधतीं हस्तैः प्रवाल-प्रभां,
सेवे सैरिभ-मर्दिनीमिह महा-लक्ष्मीं सरोज-स्थितां॥

ॐ ऐं स्त्रीं नमः पराऽपराणां परमा, त्वमेव परमेश्वरी।
यच्च किञ्चित् क्वचिद् वस्तु, सदसद् वाऽखिलात्मिके नमो स्त्रीं ऐं ॐ॥८२॥

१००० जपात् सिद्धिः, घृत-पायस होमः।

* * *

८३

विनियोगः — ॐ अस्य श्री **'तस्य सर्वस्य'** इति सप्तशती-त्र्यशीत-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहासरस्वती देवता, प्रूं बीजं, सिद्धिदा शक्तिः, श्रीकमला महाविद्या, सतो गुणः, त्वक् ज्ञानेन्द्रियं, स्तवन रसः, भग कर्मेन्द्रियं, मृदु स्वरं, जल तत्त्वं, प्रतिष्ठा कला, ह्रीं उत्कीलनं, सम्पुट मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-बीज-लोम-विलोम-पुटितोक्त-त्र्यशीत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे—शिरसि, श्रीमहासरस्वती-देवतायै नमः द्वादशारे—हृदि, प्रूं वीजाय नमः षडारे—लिङ्गे, सिद्धिदा-शक्त्यै नमः दशारे—नाभौ, श्रीकमला-महाविद्यायै नमः चतुरारे—कण्ठे, सतो-गुणाय नमः अन्तरारे— मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, स्तवन-रसाय नमः चेतसि, भग-कर्मेन्द्रियाय नमः भग-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः षडारे—गुदे, प्रतिष्ठा-कलायै नमः करतले, ह्रीं उत्कीलनाय नमः पादयोः, सम्पुट-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्या- युरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्वबीज-लोम-विलोम-पुटितोक्त-त्र्यशीत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं प्रूं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
तस्य सर्वस्य या शक्तिः	मध्यमाभ्यां वषट्	शिखायै वषट्
सा त्वं किं स्तूयसे तदा	अनामिकाभ्यां हुम्	कवचाय हुम्
यया त्वया जगत्-स्रष्टा	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
जगत्-पाताऽत्ति यो जगत्	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **शुक्लां ब्रह्म - विचार-सार-परमाद्यां जगद्-व्यापिनीम्,**

वीणा-पुस्तक-धारिणीमभयदां जाड्यान्धकारापहाम्।

हस्ते स्फाटिक-मालिकां विदधतीं पद्मासने संस्थिताम्,

वन्दे तां परमेश्वरीं भगवतीं बुद्धि-प्रदां शारदाम्॥

ॐ ऐं प्रूं नमः तस्य सर्वस्य या शक्तिः, सा त्वं किं स्तूयसे तदा।

यया त्वया जगत्-स्रष्टा, जगत्-पाताऽत्ति यो जगत् नमो प्रूं ऐं ॐ॥८३॥

१००० जपात् सिद्धिः, घृत-पायस होमः।

* * *

८४

विनियोगः — ॐ अस्य श्री **'सोऽपि निद्रा-वशं नीतः'** इति सप्तशती-चतुरशीत-मन्त्रस्य श्री ब्रह्मा ऋषिः, श्रीमहाकाली देवता, स्रूं वीजं, महा-क्रोधा शक्तिः, धूमा महाविद्या, तमो गुणं, रसना ज्ञानेन्द्रियं, स्तवन रसं, वाक् कर्मेन्द्रियं, मृदु स्वरं, भू तत्त्वं, निवृत्ति कला, क्रीं उत्कीलनं, सम्पुट मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुरशीत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे—शिरसि, श्रीमहाकाली-देवतायै नमः द्वादशारे —हृदि, स्रूं बीजाय नमः षडारे—लिङ्गे, महा-क्रोधा-शक्त्यै नमः दशारे—नाभौ, श्रीधूमा-महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे— मनसि, रसना-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, स्तवन-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, भू-तत्वाय नमः चतुरारे—गुदे, निवृत्ति-कलायै नमः करतले, क्रीं उत्कीलनाय नमः पादयोः, सम्पुट-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-चतुरशीत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं स्रूं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
सोऽपि निद्रा-वशं नीतः	मध्यमाभ्यां वषट्	शिखायै वषट्
कस्त्वां स्तोतुमिहेश्वरः	अनामिकाभ्यां हुम्	कवचाय हुम्
विष्णुः शरीर-ग्रहणं	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
अहमीशान एव च	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **दंष्ट्रा रौद्रे मुखेऽस्मिंस्तव विशति जगद्देवि! सर्वं क्षणार्द्धात्।**
संसारस्यान्त-काले नर-रुधिर-वसा-सम्प्लवे भूम-विद्युः॥
काली कापालिकी सा शव-शयन-तरा योगिनी योग-मुद्रा।
रक्ता-रुद्धिः समस्त-मरण-भय-हरा त्वं शिवा चन्द्र-घण्टा॥

ॐ ऐं स्रूं नमः सोऽपि निद्रा-वशं नीतः, कस्त्वां स्तोतुमिहेश्वरः।
विष्णुः शरीर - ग्रहणमहमीशान एव च नमो स्रूं ऐं ॐ॥८४॥

१००० जपात् सिद्धिः, घृत-तिल-छागेन होमः।

* * *

८५

विनियोगः — ॐ अस्य श्री **'कारितास्ते यतो'** इति सप्तशती-पञ्चाशीत-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहालक्ष्मी देवता, ज्रां बीजं, भैरवी शक्तिः, श्रीमातङ्गी महाविद्या, रजो गुणः, घ्राण ज्ञानेन्द्रियं, स्तवन रसं, पाद कर्मेन्द्रियं, मृदु स्वरं, आकाश तत्त्वं, परा-शान्तिः कला, श्रीं उत्कीलनं, सम्पुट मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-पञ्चाशीत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे— शिरसि, श्रीमहालक्ष्मी-देवतायै नमः द्वादशारे—हृदि, ज्रां वीजाय नमः षडारे-- लिङ्गे, भैरवी-शक्त्यै नमः दशारे— नाभौ, श्रीमातङ्गी-महाविद्यायै नमः षोडशारे— कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, स्तवन-रसाय नमः चेतसि, पाद-कर्मेन्द्रियाय नमः पाद-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, आकाश-तत्वाय नमः चतुरारे— गुदे, परा-शान्ति-कलायै नमः करतले, श्रीं उत्कीलनाय नमः पादयोः, सम्पुट-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-पञ्चाशीत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं ज्रां	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
कारितास्ते यतोऽतस्त्वां	मध्यमाभ्यां वषट्	शिखायै वषट्
कः स्तोतुं शक्तिमान् भवेत्	अनामिकाभ्यां हुम्	कवचाय हुम्
सा त्वमित्थं प्रभावैः स्वैः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
उदारैर्देवि संस्तुता	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **अक्ष-स्रक्-परशुं गदेषु-कुलिशं पद्मं धनुः कुण्डिकाम्,**
दण्डं शक्तिमसिं च चर्म-जलजं घण्टां सुरा-भाजनम्।
शूलं पाश-सुदर्शने च दधतीं हस्तैः प्रवाल-प्रभाम्,
सेवे सैरिभ-मर्दिनीमिह महा-लक्ष्मीं सरोज-स्थिताम्।।

ॐ ऐं ज्रां नमः कारितास्ते यतोऽतस्त्वां, कः स्तोतुं शक्तिमान् भवेत्।
सा त्वमित्थं प्रभावैः, स्वैरुदारैर्देवि! संस्तुता नमो ज्रां ऐं ॐ।।८५।।

१००० जपात्सिद्धिः, पायस-ज्ञागेन-होमः।

* * *

८६

विनियोगः — ॐ अस्य श्री **'मोहयैतौ दुराधर्षा'** इति सप्तशती-षडशीत-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहासरस्वती देवता, वौं वीजं, इन्द्राणी शक्तिः, श्रीभैरवी महाविद्या, सतो गुणः, श्रोत्र ज्ञानेन्द्रियं, स्तवन रसः, कर-कर्मेन्द्रियं, मृदु स्वरः, वायुः तत्त्वं, शान्तिः कला, ऐं उत्कीलनं, सम्पुटी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-षडशीत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीब्रह्मा-ऋषये नमः सहस्रारे—शिरसि, श्रीमहासरस्वती-देवतायै नमः द्वादशारे— हृदि, वौं वीजाय नमः षडारे—लिङ्गे इन्द्राणी-शक्त्यै नमः दशारे—नाभौ, श्रीभैरवी-महाविद्यायै नमः षोडशारे— कण्ठे, सतो-गुणाय नमः अन्तरारे— मनसि, श्रोत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, स्तवन-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, वायु-तत्वाय नमः चतुरारे— गुदे, शान्ति-कलायै नमः करतले, ऐं उत्कीलनाय नमः पादयोः, सम्पुटी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-षडशीत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं वौं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
मोहयैतौ दुराधर्षा	मध्यमाभ्यां वषट्	शिखायै वषट्
असुरौ मधु-कैटभौ	अनामिकाभ्यां हुम्	कवचाय हुम्
प्रबोधं च जगत्-स्वामी	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
नीयतामच्युतो लघु	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्।।
गौरी-देह-समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि - दैत्यार्दिनीम्।।

ॐ ऐं वौं नमः मोहयैतौ दुराधर्षावसुरौ मधु - कैटभौ।
प्रबोधं च जगत्-स्वामी, नीयतामच्युतो लघु नमो वौं ऐं ॐ।।८६।।

१००० जपात् सिद्धिः, घृत-पायस-होमः।

* * *

८७

विनियोगः — ॐ अस्य श्री **'बोधश्च क्रियतां'** इति सप्तशती-सप्ताशीत-मन्त्रस्य श्रीब्रह्मा ऋषिः, श्रीमहाकाली देवता, ॐ बीजं, आग्नेयी शक्तिः, श्री भुवनेश्वरी महा-विद्या, तमो गुणः, नेत्र ज्ञानेन्द्रियं, स्तवन रसः, योनिः कर्मेन्द्रियं, मृदु स्वरं, अग्निस्तत्त्वं, विद्या कला, ह्रीं उत्कीलनं, सम्पुटी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्ताशीत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीब्रह्मा-ऋषये नमः सहस्रारे—शिरसि, श्रीमहाकाली-देवतायै नमः द्वादशारे—हृदि, ॐ बीजाय नमः षडारे— लिङ्गे, आग्नेयी-शक्त्यै नमः दशारे— नाभौ, श्रीभुवनेश्वरी-महा-विद्यायै नमः षोडशारे— कण्ठे, तमो-गुणाय नमः अन्तरारे— मनसि, नेत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, स्तवन रसाय नमः चेतसि, योनि-कर्मेन्द्रियाय नमः योनि-कर्मेन्द्रिये, मृदु-स्वराय नमः कण्ठ-मूले, अग्नि तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः करतले, ह्रीं उत्कीलनाय नमः पादयोः, सम्पुटी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-सप्ताशीत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ ॐ	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ॐ नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
ॐ ऐं ॐ नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
बोधश्च क्रियतामस्य	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
हन्तुमेतौ महाऽसुरो	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **खड्गं चक्र - गदेषु-चाप-परिघान् शूलं भुशुण्डीं शिरः।**
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्ग-भूषावृताम्॥
नीलाश्म-द्युतिमास्य-पाद-दशकां सेवे महा-कालिकाम्।
यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्॥

ॐ ऐं ॐ नमः बोधश्च क्रियतामस्य, हन्तुमेतौ महाऽसुरौ नमो ॐ ऐं ॐ॥८७॥

१००० जपात् सिद्धिः, पायस-घृत-ब्राह्मी होमः।

* * *

८८

विनियोगः — ॐ अस्य श्री **'ऋषिरुवाच'** इति सप्तशती-अष्टाशीत-मन्त्रस्य श्रीवेद-व्यास ऋषिः, श्रीमहा-सरस्वती देवता, श्रौं वीजं, त्राण-करी शक्तिः, श्रीतारा महा-विद्या, सत्व गुणः, श्रोत्र ज्ञानेन्द्रियं, सौम्य रसं, कर कर्मेन्द्रियं, मध्यमं स्वरं, भू तत्त्वं, निवृत्ति कला, ह्रीं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीजं-लोम-विलोम-पुटितोक्त-अष्टाशीत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्री वेदव्यास-ऋषये नमः सहस्रारे—शिरसि श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे— हृदि, श्रौं वीजाय नमः षडारे — लिङ्गे, त्राण-करी-शक्त्यै नमः दशारे— नाभौ, श्रीतारा-महा-विद्यायै नमः षोडशारे— कण्ठे, सत्व-गुणाय नमः अन्तरारे— मनसि, श्रोत्र-ज्ञानेन्द्रियाय नम ज्ञानेन्द्रिये, सौम्य-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, मध्यम-स्वराय नमः कण्ठ-मूले, भू-तत्वाय नमः चतुरारे— गुदे, निवृत्ति कलायै नमः करतले, ह्रीं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीजं-लोम-विलोम-पुटितोक्त-अष्टाशीत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमो	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
श्रौं नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
नमो नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ ऐं श्रौं नमः	कनिष्ठिभ्यां वौषट्	नेत्र-त्रयाय वौषट्
ऋषिरुवाच	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यान— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्।।
गौरी-देह-समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि-दैत्यार्दिनीम्।।

ॐ ऐं श्रौं नमः **ऋषिरुवाच** **नमो श्रौं ऐं ॐ।।८८।।**

* * *

८६

विनियोगः — ॐ अस्य श्री **'एवं स्तुता'** इति सप्तशती-नवाशीत-मन्त्रस्य श्रीमार्कण्डेय ऋषिः, श्रीमहालक्ष्मी देवता, ऋृं वीजं, वाराही शक्तिः, श्रीसुन्दरी महा-विद्या, रजो गुणः, चक्षुः ज्ञानेन्द्रियं, सौम्य रसः, कर कर्मेन्द्रियं, मध्यम स्वरं, आकाश तत्त्वं, परा शान्ति कला, श्रीं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-नवाशीत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीमार्कण्डेय-ऋषये नमः सहस्रारे—शिरसि, श्रीमहालक्ष्मी-देवतायै नमः द्वादशारे— हृदि, ऋृं वीजाय नमः षडारे—लिङ्गे, वाराही शक्त्यै नमः दशारे— नाभौ, श्रीसुन्दरी महा-विद्यायै नमः षोडशारे-कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, चक्षु-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, सौम्य-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, मध्यम-स्वराय नमः कण्ठ-मूले, आकाश-तत्त्वाय नमः चतुरारे— गुदे, परा-शान्ति-कलायै नमः करतले, श्रीं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-नवाशीत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ ऋृं	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ॐ नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
ॐ ऐं ऋृं नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
एवं स्तुता तदा देवी	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
तामसी तत्र वेधसा	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **कान्त्या काञ्चन-सन्निभां हिम-गिरि-प्रख्यैश्चतुर्भिर्गजैः।**
हस्तोत्क्षिप्त - हिरण्मयामृत-घटैरासिच्य-मानां श्रियं।।
विभ्राणां वरमब्ज-युग्ममभयं हस्तैः किरीटोज्ज्वलां।
क्षौमाबद्ध-नितम्ब-बिम्ब-वलितां वन्देऽरविन्द-स्थितां।।

ॐ ऐं ऋृं नमः एवं स्तुता तदा देवी, तामसी तत्र वेधसा नमो ऐं ऋृं ॐ।।८६।।

१००० जपात् सिद्धिः, घृत-पायस-होमः।

* * *

९०

विनियोगः — ॐ अस्य श्री **'विष्णोः प्रबोधनार्थाय'** इति सप्तशती-नवति-तम-मन्त्रस्य श्रीमार्कण्डेय ऋषिः, श्री महासरस्वती देवता, रूं बीजं, खड्ग-धारिणी शक्तिः, श्रीछिन्नमस्ता महा-विद्या, सतो गुणः श्रोत्र ज्ञानेन्द्रियं, सौम्य रसः, पद कर्मेन्द्रियं, मध्यम स्वरं, वायु तत्त्वं, शान्ति कला, ऐं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-नवति-तम-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीमार्कण्डेय-ऋषये नमः सहस्रारे-शिरसि, श्रीमहासरस्वती-देवतायै नमः द्वादशारे—हृदि, रूं बीजाय नमः षडारे— लिङ्गे, खड्ग-धारिणी-शक्त्यै नमः दशारे— नाभौ, श्रीछिन्नमस्ता-महा-विद्यायै नमः षोडशारे— कण्ठे, सतो-गुणाय नमः अन्तरारे— मनसि, श्रोत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, सौम्य-रसाय नमः चेतसि, पद-कर्मेन्द्रियाय नमः पद-कर्मेन्द्रिये, मध्यम-स्वराय नमः कण्ठ-मूले, वायु तत्वाय नमः चतुरारे— गुदे, शान्ति कलायै नमः करतले, ऐं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-नवति-तम-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं रूँ	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
विष्णोः प्रबोधनार्थाय	मध्यमाभ्यां वषट्	शिखायै वषट्
निहन्तुं मधु-कैटभौ	अनामिकाभ्यां हुम्	कवचाय हुम्
नेत्रास्य-नासिका-बाहु	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
हृदयेभ्यस्तथोरसः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्॥
गौरी-देह-समुद्भवां त्रि-जगतामाधार - भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि-दैत्यार्दिनीम्॥

ॐ ऐं रूं नमः विष्णोः प्रबोधनार्थाय, निहन्तुं मधु - कैटभौ।
नेत्रास्य - नासिका - बाहु - हृदयेभ्यस्तथोरसः नमो रूं ऐं ॐ॥९०॥

१००० जपात् सिद्धिः, घृत-पायस-तिलैः होमः।

* * *

९१

विनियोगः — ॐ अस्य श्री **'निर्गम्य दर्शने'** इति सप्तशती-एक-नवत-मन्त्रस्य श्रीवेदव्यास ऋषिः, श्रीमहा-काली देवता, क्लीं बीजं, वारुणी शक्तिः, श्रीतारा महाविद्या, तमो गुणं, घ्राण ज्ञानेन्द्रियं, शान्त रसं, वाक् कर्मेन्द्रियं, सौम्य स्वरं, अग्निस्तत्वं, विद्या कला, क्रीं उत्कीलनं, दश-मुखी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थ श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-एक-नवत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीवेदव्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे— हृदि, क्लीं वीजाय नमः षडारे—लिङ्गे, वारुणी शक्त्यै नमः दशारे— नाभौ, श्रीतारा-महाविद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे— मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः करतले, क्रीं उत्कीलनाय नमः पादयोः, दश-मुखी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थ श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-एक-नवत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं क्लीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
निर्गम्य दर्शने तस्थौ	मध्यमाभ्यां वषट्	शिखायै वषट्
ब्रह्मणोऽव्यक्त-जन्मनः	अनामिकाभ्यां हुम्	कवचाय हुम्
उत्तस्थौ च जगन्नाथः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
तथा मुक्तो जनार्दनः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **खड्गं चक्र-गदेषु-चाप-परिघान् शूलं भुशुण्डीं शिरः।**
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्ग-भूषावृताम्॥
नीलाश्म-द्युतिमास्य-पाद-दशकां सेवे महा-कालिकाम्।
यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्॥

ॐ ऐं क्लीं नमः निर्गम्य दर्शने तस्थौ, ब्रह्मणोऽव्यक्त-जन्मनः।
उत्तस्थौ च जगन्नाथः, तथा मुक्तो जनार्दनः नमो क्लीं ऐं ॐ॥९१॥

१००० जपात् सिद्धिः, घृत-पायस होमः।

* * *

६२

विनियोगः — ॐ अस्य श्री **'एकार्णऽवे-हि-शयनात्'** इति सप्तशती-द्वा-नवत-मन्त्रस्य श्रीवेदव्यास ऋषिः, श्रीदुर्गा देवता, दुं बीजं, मृग-वाहिनी शक्तिः, श्रीकाली महा-विद्या, रजो-गुणः, रसना ज्ञानेन्द्रियं, शान्त रसः, लिङ्ग कर्मेन्द्रियं, सौम्य स्वरं, जल तत्त्वं, प्रतिष्ठा कला, श्रीं उत्कीलनं, एक-मुखी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-द्वा-नवत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीवेदव्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीदुर्गा-देवतायै नमः द्वादशारे—हृदि, दुं वीजाय नमः षडारे— लिङ्गे, मृग-वाहिनी-शक्त्यै नमः दशारे —नाभौ, श्रीकाली-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, रसना-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, लिङ्ग-कर्मेन्द्रियाय नमः लिङ्ग-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे—गुदे, प्रतिष्ठा-कलायै नमः करतले, श्रीं उत्कीलनाय नमः पादयोः, एक-मुखी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-द्वा-नवत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं दुं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
एकार्णवेऽहि-शयनात्	मध्यमाभ्यां वषट्	शिखायै वषट्
ततः स ददृशे च तौ	अनामिकाभ्यां हुम्	कवचाय हुम्
मधु-कैटभौ दुरात्मनौ	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
अति-वीर-पराक्रमौ	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं—**विद्युद्-दाम-सम-प्रभां मृग-पति-स्कन्ध-स्थितां भीषणाम्,**
कन्याभिः करवाल-खेट-विलसद्-हस्ताभिरासेविताम्।
हस्तैश्चक्र-गदाऽसि-खेट-विशिखांश्चापं गुणं तर्जनीम्,
बिभ्राणामनलात्मिकां शशि-धरां दुर्गां त्रिनेत्रां भजे।।

ॐ ऐं दुं नमः एकार्णवेऽहि-शयनात्, ततः स ददृशे च तौ।
मधु - कैटभौ दुरात्मानावति-वीर्य-पराक्रमौ नमो दुं ऐं ॐ।।६२।।

१००० जपात् सिद्धिः, घृत-पायस होमः।

* * *

६३

विनियोगः — ॐ अस्य श्री **'क्रोध-रक्तेक्षणा'** इति सप्तशती-त्रयो-नवत-मन्त्रस्य श्रीवेदव्यास ऋषिः, श्रीमहासरस्वती देवता, ह्रीं वीजं, कौमारी शक्तिः, श्रीतारा महा-विद्या, सतो गुणः, त्वक् ज्ञानेन्द्रियं, शान्त रसः, गुद कर्मेन्द्रियं, सौम्य स्वरं, भू तत्त्वं, निवृत्ति कला, ऐं उत्कीलनं, श्रीमहा-योनि मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-त्रयो-नवत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीवेदव्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहासरस्वती-देवतायै नमः द्वादशारे—हृदि, ह्रीं वीजाय नमः षडारे-लिङ्गे, कौमारी-शक्त्यै नमः दशारे— नाभौ, श्रीतारा-महाविद्यायै नमः षोडशारे— कण्ठे, सतो-गुणाय नमः अन्तरारे— मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे—गुदे, निवृत्ति-कलायै नमः करतले, ऐं उत्कीलनाय नमः पादयोः, श्रीमहा-योनि-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-त्रयो-नवत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं ह्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
क्रोध-रक्तेक्षणावत्तुं	मध्यमाभ्यां वषट्	शिखायै वषट्
ब्रह्माणं जनितोद्यमौ	अनामिकाभ्यां हुम्	कवचाय हुम्
समुत्थाय ततस्ताभ्यां	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
युयुधे भगवान् हरिः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **शुक्लां ब्रह्म-विचार-सार-परमाद्यां जगद्-व्यापिनीम्,**
वीणा-पुस्तक-धारिणीमभयदां जाड्यान्धकारापहाम्।
हस्ते स्फाटिक-मालिकां विदधतीं पद्मासने संस्थिताम्,
वन्दे तां परमेश्वरीं भगवतीं बुद्धि-प्रदां शारदाम्॥

ॐ ऐं ह्रीं नमः क्रोध -.रक्तेक्षणावत्तुं, ब्रह्माणं जनितोद्यमौ।
समुत्थाय ततस्ताभ्यां, युयुधे भगवान् हरिः नमो ह्रीं ऐं ॐ॥६३॥

१००० जपात् सिद्धिः, घृत-पायस-तिलैः होमः।

* * *

६४

विनियोगः — ॐ अस्य श्री **'पञ्च-वर्ष-सहस्राणि'** इति सप्तशती-चतुर्नवत-मन्त्रस्य श्रीवेदव्यास ऋषिः, श्रीमहाकाली देवता, गूं बीजं, कौबेरी शक्तिः, श्रीछिन्नमस्ता महा-विद्या, तमो गुणः, त्वक् ज्ञानेन्द्रियं, शान्त रसः, योनिः कर्मेन्द्रियं, सौम्य स्वरं, आकाश तत्त्वं, परा-शान्तिः कला, ह्रीं उत्कीलनं, महा-योनि मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्नवत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीवेदव्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहाकाली-देवतायै नमः द्वादशारे—हृदि, गूं बीजाय नमः षडारे— लिङ्गे, कौबेरी-शक्त्यै नमः दशारे— नाभौ, श्रीछिन्नमस्ता-महा-विद्यायै नमः चेतसि, तमो-गुणाय नमः अन्तरारे-मनसि, त्वक् ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, योनि-कर्मेन्द्रियाय नमः योनि-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, आकाश-तत्त्वाय नमः चतुरारे—गुदे, परा-शान्ति-कलायै नमः करतले, ह्रीं उत्कीलनाय नमः पादयोः, महा-योनि-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-चतुर्नवत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं गूं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
पञ्च-वर्ष-सहस्राणि	मध्यमाभ्यां वषट्	शिखायै वषट्
बाहु-प्रहरणो विभुः	अनामिकाभ्यां हुम्	कवचाय हुम्
तावप्यति-बलोन्मत्तौ	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
महा-माया-विमोहितौ	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **ध्यायेत् कालीं महा-मायां, त्रि-नेत्रां बहु-रूपिणीम्,**
चतुर्भुजां ललज्जिह्वां, पूर्ण-चन्द्र-निभाननाम्।
नीलोत्पल-दल-श्यामां, शत्रु - सङ्घ-विदारिणीम्,
नर-मुण्डं तथा हि खड्गाभयं च वरं तथा॥

ॐ ऐं गूं नमः पञ्च-वर्ष-सहस्राणि, बाहु-प्रहरणो विभुः।
तावप्यति-बलोन्मत्तौ, महा-माया-विमोहितौ नमो गूं ऐं ॐ॥६४॥

१००० जपात् सिद्धिः, छाग-पायस-घृत होमः।

* * *

९५

विनियोगः — ॐ अस्य श्री **'उक्त-वन्तौ वरो'** इति सप्तशती-पञ्च-नवत-मन्त्रस्य श्रीवेदव्यास ऋषिः, श्रीमहालक्ष्मी देवता, लां वीजं, ईशाना शक्तिः, श्रीसुन्दरी महाविद्या, रजो-गुणः, रसना ज्ञानेन्द्रियं, शान्त रसः, गुद कर्मेन्द्रियं, सौम्य स्वरं, वायुः तत्त्वं, शान्ति कला, श्रीं उत्कीलनं, महा-योनि मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-पञ्च-नवत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीवेदव्यास-ऋषये नमः सहस्रारे— शिरसि, श्रीमहालक्ष्मी-देवतायै नमः द्वादशारे—हृदि, लां वीजाय नमः षडारे—लिङ्गे, ईशाना-शक्त्यै नमः दशारे—नाभौ, श्रीसुन्दरी-महा-विद्यायै नमः षोडशारे— कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, रसना-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, वायु-तत्त्वाय नमः चतुरारे— गुदे, शान्ति-कलायै नमः करतले, श्रीं उत्कीलनाय नमः पादयोः, महा-योनि-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-पञ्च-नवत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमो	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
लां नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
ॐ ऐं लां नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
उक्त-वन्तौ वरोऽस्मत्तो	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
व्रियतामिति केशवं	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **श्रीं-वीजे! नाद - विन्दु-द्वितय-शशि-कलाकार-रूपे! स्वरूपे!**
मातर्मे देहि बुद्धिं जहि जहि दुरितं पाहि मां दीन-नाथे!
अज्ञान-ध्वान्त-नाशे! क्षय-रुचि-रुचिरे! प्रोल्लसत्-पाद-पद्मे!
ब्रह्मेशाद्यैः सुरेन्द्रैः सुर-गण-नमिते! संस्तुते त्वां नमामि॥

ॐ ऐं लां नमः उक्त-वन्तौ वरोऽस्मत्तो, व्रियतामिति केशवं नमो लां ऐं ॐ॥९५॥

१००० जपात् सिद्धिः, घृत-पायस-मांस-तिलैः होमः।

* * *

९६

विनियोगः — ॐ अस्य श्री **'भगवान् उवाच'** इति सप्तशती-षण्ण-नवत-मन्त्रस्य श्रीमार्कण्डेय ऋषिः, श्रीमहा-लक्ष्मी देवता, ह्रां बीजं, शूल-धारिणी शक्तिः, श्रीभुवनेश्वरी महा-विद्या, सत्व गुणः, घ्राण ज्ञानेन्द्रियं, शान्त रसः, लिङ्ग कर्मेन्द्रियं, सौम्य स्वरं, अग्निस्तत्वं, विद्या कला, ऐं उत्कीलनं, महा-योनि मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-षण्णवत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीमार्कण्डेय-ऋषये नमः सहस्रारे—शिरसि, श्रीमहालक्ष्मी-देवतायै नमः द्वादशारे— हृदि, ह्रां वीजाय नमः षडारे—लिङ्गे, शूल-धारिणी-शक्त्यै नमः दशारे— नाभौ, श्रीभुवनेश्वरी-महा-विद्यायै नमः षोडशारे— कण्ठे, सत्व-गुणाय नमः अन्तरारे— मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त रसाय नमः चेतसि, लिङ्ग-कर्मेन्द्रियाय नमः लिङ्ग-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, अग्नि-तत्वाय नमः चतुरारे— गुदे, विद्या-कलायै नमः करतले, ऐं उत्कीलनाय नमः पादयोः, महा-योनि-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-षण्ण-नवत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ह्रां नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
नमो नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ ऐं ह्रां नमः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
भगवानुवाच	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **श्रीं वीजे! नाद-विन्दु-द्वितय-शशि-कलाकार-रूपे! स्वरूपे!**

मातर्मे देहि बुद्धिं जहि जहि दुरितं पाहि मां दीन-नाथे!

अज्ञान-ध्वान्त-नाशे! क्षय-रचि-रुचिरे! प्रोल्लसत्-पाद-पद्मे!

ब्रह्मेशाद्यैः सुरेन्द्रैः सुर-गण-नमिते! संस्तुते त्वां नमामि॥

ॐ ऐं ह्रां नमः भगवानुवाच नमो ह्रां ऐं ॐ॥९६॥

१००० जपात्सिद्धिः, छाग-घृत-तिल-पायसैः होमः।

* * *

९७

विनियोगः — ॐ अस्य श्री **'भवेतामद्य मे तुष्टौ'** इति सप्तशती-सप्त-नवत-मन्त्रस्य श्रीभगवान् विष्णु ऋषिः, श्रीमहासरस्वती देवता, गं बीजं, ब्राह्मी शक्तिः, श्रीभुवनेश्वरी महा-विद्या, सतो गुणः, घ्राण ज्ञानेन्द्रियं, शान्त रसः, लिङ्ग कर्मेन्द्रियं, सौम्य स्वरं, अग्निस्तत्त्वं, विद्या कला, ऐं उत्कीलनं, महा-योनि मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्त-नवत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीभगवान् विष्णु-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, गं बीजाय नमः षडारे—लिङ्गे, ब्राह्मी-शक्त्यै नमः दशारे—नाभौ, श्रीभुवनेश्वरी-महाविद्यायै नमः षोडशारे— कण्ठे, सतो-गुणाय नमः अन्तरारे— मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, लिङ्ग-कर्मेन्द्रियाय नमः लिङ्ग-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः करतले, ऐं उत्कीलनाय नमः पादयोः, महा-योनि-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-सप्त-नवत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
गं नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
ॐ ऐं गं नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
भवेतामद्य मे तुष्टौ	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
मम वध्यावुभावपि	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **ऐं वीजं वाग्भवाख्यं त्वमिह जड़-मति-ध्वान्त-चक्षुः-प्रकाशा,**
मातः! कारुण्य-धारा भव-वलित-दृशा पश्य मां दीन-नाथे!
मोह्यन्ते मोहितास्ते तव जननि! महा-मायया बद्ध-चित्ताः,
कारुण्यं प्रार्थयन्ते मम विशतु भुजां नाशितुं कैटभानाम्॥

ॐ ऐं गं नमः भवेतामद्य मे तुष्टौ, मम वध्यावुभावपि नमो गं ऐं ॐ॥९७॥

१००० जपात् सिद्धिः, घृत-मांस-तिलैः होमः।

* * *

६८

विनियोगः — ॐ अस्य श्री **'किमन्येन वरेणात्र'** इति सप्तशती-अष्टा-नवत-मन्त्रस्य श्रीभगवान् विष्णु ऋषिः, श्रीमहाकाली देवता, ऐं वीजं, वैष्णवी शक्तिः, श्रीभैरवी महाविद्या, तमो गुणः, श्रोत्र ज्ञानेन्द्रियं, शान्त रसः, वाक् कर्मेन्द्रियं, सौम्य स्वरं, जल-तत्त्वं, प्रतिष्ठा कला, क्रीं उत्कीलनं, महा-योनि मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-अष्टा-नवत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीभगवान् विष्णु-ऋषये नमः सहस्रारे— शिरसि, श्रीमहाकाली-देवतायै नमः द्वादशारे— हृदि, ऐं बीजाय नमः षडारे— लिङ्गे, वैष्णवी-शक्त्यै नमः दशारे— नाभौ, श्रीभैरवी-महाविद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे—मनसि, श्रोत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे—गुदे, प्रतिष्ठा-कलायै नमः करतले, क्रीं उत्कीलनाय नमः पादयोः, महा-योनि-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-अष्टा-नवत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ऐं नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
ॐ ऐं ऐं नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
किमन्येन वरेणात्र	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
एतावद्धि वृतं मया	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **अन्तर्वीज-स्वरूपे! त्रि-जगति वरदे! व्रीडया या स्थितेऽयम्,**

तां नित्यां शम्भु-शक्तिं त्रि-भुवन-जननीं पालिनीं जन्म-हेतुम्।

सर्वासां तां निदानं सकल-गुण-मयीं सच्चिदानन्द-रूपाम्,

तेजो-रूपां प्रदीप्तां त्रिभुवन-नमितां ज्ञान-दात्रीं नमामि॥

ॐ ऐं ऐं नमः किमन्येन वरेणात्र, एतावद्धि वृतं मया नमो ऐं ऐं ॐ॥६८॥

१००० जपात् सिद्धिः, घृत-तिल-छागेन होमः।

* * *

९९

विनियोगः — ॐ अस्य श्री **'ऋषिरुवाच'** इति श्री सप्तशती नव-नवत-मन्त्रस्य श्रीवेद-व्यास ऋषिः, श्रीमहा-सरस्वती देवता, श्रौं वीजं, त्राण-करी शक्तिः, श्रीतारा महा-विद्या, सत्व गुणः, श्रोत्र ज्ञानेन्द्रियं, सौम्य रसं, कर कर्मेन्द्रियं, सौम्य स्वरं, भू तत्त्वं, निवृत्ति कला, ह्रीं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थ श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीजं-लोम-विलोम-पुटितोक्त-नव-नवत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्री वेदव्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे— हृदि, श्रौं वीजाय नमः षडारे — लिङ्गे, त्राण-करी-शक्त्यै नमः दशारे-नाभौ, श्रीतारा-महा-विद्यायै नमः षोडशारे-कण्ठे, सत्व-गुणाय नमः अन्तरारे-मनसि, श्रोत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, सौम्य-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, भू-तत्वाय नमः चतुरारे— गुदे, निवृत्ति-कलायै नमः करतले, ह्रीं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थ श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थ च नमो-युत-प्रणव-वाग्वीज-स्ववीजं-लोम-विलोम-पुटितोक्त-नव-नवत्-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमो	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
श्रौं नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
नमो नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ ऐं श्रौं नमः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
ऋषिरुवाच	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यान— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्॥
गौरी - देह -समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि - दैत्यार्दिनीम्॥

ॐ ऐं श्रौं नमः **ऋषिरुवाच** **नमो श्रौं ऐं ॐ॥९९॥**

१०० जपात् सिद्धि, घृत-पायस-होमः।

* * *

१००

विनियोगः — ॐ अस्य श्री **'वञ्चिताभ्यां'** इति सप्तशती-शत-तम-मन्त्रस्य श्री मेधस ऋषिः, श्रीमहालक्ष्मी देवता, जूं वीजं, रौद्री शक्तिः, श्रीकमला महा-विद्या, रजो गुणः, चक्षु ज्ञानेन्द्रियं, शान्त रसं, कर कर्मेन्द्रियं, सौम्य स्वरं, भू तत्त्वं, प्रवृत्ति कला, श्रीं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-शत-तम-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहालक्ष्मी-देवतायै नमः द्वादशारे—हृदि, जूं बीजाय नमः षडारे—लिङ्गे, रौद्री-शक्त्यै नमः दशारे—नाभौ, श्रीकमला-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे—मनसि, चक्षु-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे—गुदे, प्रवृत्ति-कलायै नमः करतले, श्रीं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्या- भिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्ववीज-लोम-विलोम-पुटितोक्त-शत-तम-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
जूं नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
ॐ ऐं जूं नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
वञ्चिताभ्यामिति तदा	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
सर्वमापो-मयं जगत्	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **यन्मोह्यौ मधु-कैटभौ प्रकृतिः सा माया महा-लक्ष्यदा,**
त्वं सिद्धिः त्रिपुरान्तका स्मर-रिपु-सम्मोहिनी मोहदा।
यामाराध्य स विष्णु विश्व-कर्ता ब्रह्मा शिवो संहतिः,
सा मां पातु सदैव सर्व-वशगा विष्णु-प्रिया शाङ्करी॥

ॐ ऐं जूं नमः वञ्चिताभ्यामिति तदा, सर्वमापो-मयं जगत् नमो जूं ऐं ॐ॥१००॥

१००० जपात् सिद्धिः, घृत-मांस-तिलैः होमः।

* * *

१०१

विनियोगः — ॐ अस्य श्री **'विलोक्य ताभ्यां गदितो'** इति सप्तशती-द्वितीय-शतकस्य प्रथम-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहासरस्वती देवता, डें बीजं, चामुण्डा शक्तिः, श्रीमातङ्गी महाविद्या, सतो-गुणः, त्वक् ज्ञानेन्द्रियं, शान्त रसः, पद कर्मेन्द्रियं, सौम्य-निःश्वास-युत स्वरं, आकाश तत्त्वं, परा-शान्ति कला, ह्रीं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-बीज-लोम-विलोम-पुटितोक्त-द्वितीय-शतकस्य-प्रथम-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः — श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहासरस्वती-देवतायै नमः द्वादशारे—हृदि, डें वीजाय नमः षडारे—लिङ्गे, चामुण्डा-शक्तये नमः दशारे—नाभौ, श्रीमातङ्गी-महाविद्यायै नमः षोडशारे—कण्ठे, सतो-गुणाय नमः अन्तरारे—मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, पद-कर्मेन्द्रियाय नमः पद-कर्मेन्द्रिये, सौम्य-निःश्वास-युत-स्वराय नमः कण्ठ-मूले, आकाश-तत्त्वाय नमः चतुरारे— गुदे, परा-शान्ति-कलायै नमः करतले, ह्रीं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभिवृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्वबीज-लोम-विलोम-पुटितोक्त-द्वितीय-शतकस्य प्रथम-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं डें	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
विलोक्य ताभ्यां गदितो	मध्यमाभ्यां वषट्	शिखायै वषट्
भगवान् कमलेक्षणः	अनामिकाभ्यां हुम्	कवचाय हुम्
आवां जहि न यत्रोर्वी	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
सलिलेन परिप्लुता	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्॥
गौरी - देह -समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि - दैत्यार्दिनीम्॥

ॐ ऐं डें नमः विलोक्य ताभ्यां गदितो, भगवान् कमलेक्षणः।
आवां जहि न यत्रोर्वी, सलिलेन परिप्लुता नमो डें ऐं ॐ॥१०१॥

१००० जपात् सिद्धिः, घृत-पायस-तिल-मेदैः होमः।

* * *

१०२

